वाचमालप्यते[2] रामस्त्रायते भक्तमात्मनः ॥ २३ ॥
जायते रामचन्द्रस्य मुखं कान्तिः प्रतीयते[3] ।
दिश्यते शेवधिं[4] क्रुद्धः संन्यासी शिष्यते द्विजः ॥ २४ ॥
रज्यते मे मती रामे म्रियते स्वद्गमाऽस्त्रघृक् ।
दीपः प्रकीर्यते[5] रात्रौ खिद्यते विरही जनः ॥ २५ ॥
रामः प्रपूर्यते विश्वं कीर्त्या नैव विमृष्यते ।
शूरोऽयं शक्यते युद्धे रामोऽयं पीयते पयः ॥ २६ ॥

(*Continued from the previous page*)

In (ग) after Stanza No. 20—we get the following :—

दुह्याच्पचदण्डरुधिप्रच्छिचिब्रूञ्शासजिन्मथमुषाम् । कर्मयुक्स्यादकथितं तथास्यान्नीहृकृष्वहाम् ॥१॥ गतिबुद्धि प्रत्यवसानार्थकशब्द कर्माकर्मकाणामनिकर्ता सणौ गत्यर्थानां शब्दकर्मकाणामकर्मकाणां चाणौ यः कर्त्ता सणौ कर्मस्यात् गौणे कर्मणिदुह्यादेः प्रधानेनीहृकृष्वहाम् बुद्धिभक्षार्थयोः शब्द कर्मणां च निजेच्छया ॥ १ ॥ प्रयोज्य कर्मण्यमेषीण्यंता तङ् घृङ् अवस्थाने जल्पयक्तां प्रावाचिण्यंतादस्मात् कर्मवत् कर्मणो ते न कर्त्तरि तङ् यङौ त्रैङ्: पालने शब्द जनीप्रादभावेश्यनतङ् ।

In (ङ) stanza No. 7—स्वतंत्रकर्त्ता--स्वतन्त्र कर्त्ता यथा पुण्यं करोति देवदत्तः। हेतुकर्त्ता यथा गच्छति शिष्यो ग्रामं गमयति शिक्षं गुरुः । कर्म कर्त्ता यथा स्वयमेव पक्व्यते कुशलबुद्धिः उक्तकर्त्ता यथा ग्रामं पुरुषः अनुक्तकर्त्ता यथा लोकः क्रियते विष्णुना ।

The following is written at the end of folio 5 in connection with the stanza 16 onward --

कर्म सप्तविधं ईप्सितकर्म, अनीप्सितकर्म ईप्सितानीप्सितकर्म अकथितकर्म कर्त्तृकर्म उक्तकर्म अनुक्तकर्मेति सप्तधा । ईप्सितं यथा ओदनं भुंक्ते मनुष्यः अनीप्सितं विषं भक्षयतिक्षुद्रः ईप्सितानीप्सितयथा पायसं भक्षयन् तत्र पतितंरजोऽपि भक्षयति बालः अकथित यथा गां दोग्धि पयो गोपालः कर्तृकर्म यथा गमयति पुत्रं ग्रामं पिता उक्तकर्म यथा घटः क्रियते देवदत्तेन अनुक्तकर्म यथा ओदनं पचति सूपकारः ।

१ रामोऽयँ in (ग). २ जल्प्यते in (ग). ३ प्रतीप्रियते in (क). ४ दृश्यते सेवकः क्रुद्धः । ५ प्रकीर्यते in (क).

शार्ङ्गं वोवुध्यते रामः[1] सन्तानं मन्यते जनं ।
रामो न तृप्यते हन्तुं म्रियते विरहातुरः ॥ २७ ॥
दूयते[2] क्षीयते तदाऽसौ लीयते पर्णवेश्मनि ।
डीयते[3] भयतः पक्षी मतिरेषा प्रमीयते ॥ २८ ॥
जानकी म्रियते रामं सविता दीप्यतेतराम् ।
प्रीयते रामचन्द्रोऽसौ प्रमोदो नात्र मीयते ॥ २९ ॥
चन्द्रमा दीप्यते रात्रौ समुद्रोऽस्मात् प्रपूर्यते ।
कौशल्या सूयते रामं काश्यां च भ्रीयते कृतिः ॥ ३० ॥
एतादृशानि रूपाणि भवेयुर्भावकर्मणोः ।
अन्यान्यपि यथा प्राप्तमुह्यतां स्वयमेवैहि[4] ॥ ३१ ॥
इति प्रबोधचन्द्रिकायां च वैजलभूपते[5]ः ।
विभक्तिचन्द्रिकामध्ये समाप्ता त्यादि चन्द्रिका ॥ ३२ ॥

कारक चन्द्रिका

अथ षट् कारकाणीह कथ्यते कथितान्यपि ।
अर्थो यतो विभक्तीनां[6] कारकत्वेन दर्शिता ॥ १ ॥
कर्ता कर्म च करणसंप्रदानं तथैव च ।
अपादानं तथाधारः इति षट् कारकाणि वै ॥ २ ॥
स कर्त्ता यः क्रियां साक्षादुत्पादयति सर्वतः ।
तत्कर्म क्रिया यत्तु विषयीक्रियते तराम् ॥ ३ ॥
क्रिया निष्पाद्यते येन करणं तदुदाहृतम् ।
संप्रदानं तदाख्यातां यस्मै सम्यक् प्रदीयते ॥ ४ ॥
यस्मात्[7] विभज्यते नूनं तदापादानमुच्यते ।
यत्रैवाधीयते सर्वं स तदाधार उच्यते ॥ ५ ॥

---

१ शंभुः चायुध्यते रामः सेनायां मन्यते जनः. २ दूयते in (क). ३ च in (क). ४ नामकृतौ in (क). ५ क्ती in (क). ६ यत्र वि in (क) यदपादीयते in (ग).

स्वतन्त्रहेतुं कर्मोक्तानुक्ते कर्त्तेति पञ्चधा ।
उदाहरणमेवैषां रूपमाविर्भविष्यति ॥ ६ ॥
स्वतन्त्रकर्त्ता स भवेन्निरपेक्षः क्रियासु यः ।
यथा भजाम्यहं रामं भक्तं रामः प्रसीदति ॥ ७ ॥
सं हेतुकर्त्ता भवति कुर्वन्तं प्रेरयेत्तु यः ।
यथा याति वनं रामः पिता तं यापयत्यदः ॥ ८ ॥
गतिबुद्ध्यशनार्थेषु शब्दकर्मस्वऽकर्मसु ।
अहेतौ यो भवेत् कर्त्ता सहेतौ कर्म जायते ॥ ९ ॥
गमनार्थे यथा रामो वने गच्छति धार्मिकः ।
रामं दशरथो राजा विपिनं[1] गमयत्यऽमुं ॥ १० ॥
नीवह्योर्गमनार्थेषु प्रतिषेधो भवेद्यथा ।
जानकीं[2] नयति श्रीमान् अयोध्यां रघुनन्दन ॥ ११ ॥
जनकेो[3] नाययत्येनां सीतां रामेण धीमता[4] ।
एवं वहेरुदाहार्यः त्वर्थबुद्ध्यर्थधातुषु ॥ १२ ॥
लक्ष्मणो बुद्ध्यते कार्यं रामस्तं बोधयत्यदः ।
भक्षणार्थे यथा रामो भक्तं[5] भुंक्ते सुधाकुलः ॥ १३ ॥
रामं भोजयति[6] प्रीत्या सीता सद्यृतमोदनं[7] ।
भक्षणार्थे निषेधः स्यादाऽऽदिखाद्योऽस्तु तद्यथा ॥ १४ ॥
रामोऽन्नमत्ति सीताऽन्नं रामेणादयतीप्सितं ।
एवं खादति रामोऽन्नं तेन[8] खाद्यते प्रिया ॥ १५ ॥
शब्दकर्मसु रामोऽसौ शास्त्रं पठति बुद्धिमान् ।
तं गुरु यावते नेमं[9] षेधो ह्यतेर्यथा ॥ १६ ॥

---

१ विपनं in (क) "विपिनं" इत्येव साधु पाठम् । २ जानकी in (क).
३ धीमता in (क) (ख). ४ मथ in (क). ५ दधिभुंक्तेक्षुधाकुलः in (क).
६ भोजयते in (क). ७ सद्यस्तमोदनं in (ख) (ग). ८ तंस in (क).
९ पाठयते नं निषेधो in (क) कूयते in (ख) (ग).

रामणं क्षयति श्रीमान् रामस्तं रावणं[1] रिपुम् ।
रामेणाह्वययत्येषं[2] महाबलविभीषणः ॥ १७ ॥

[Verse 18 is not in the text]

अकर्मसु यथा रामः शेते तं शाययत्यसौ ।
सीता निषेधः क्रन्देश्च यथा[3] शब्दायतेरपि ॥ १९[4] ॥
हरतेश्च करोतेश्चेऽभिवादिदृशोरपि ।
विकल्पः कथितः प्राज्ञैस्तथेदाह्रियते मया ॥ २० ॥
पाथेयं रामचन्द्रस्य लक्ष्मणो हरति स्वयम् ।
हारयत्येष पाथेयं[5] लक्ष्मणं लक्ष्मणेन चँ[6] ॥ २१ ॥
करोति लक्ष्मणः कार्यं रामः कारयति द्रुतं ।
लक्ष्मणं कार्यमधुर्ना[7] लक्ष्मणेनेति वा भवेत् ॥ २२ ॥
अभिवदति रानो[8] गुरुं हेतोः तथा पुनः ।
अभिवादयते रामं गुरुं रामेण चँ[9] पिता ॥ २३ ॥
लंकां[10] पश्यति रामोऽयं रामं दर्शयते कपिः ।
लंका रामेण देत्येवमुदाहरणमुह्यताम् ॥ २४ ॥
उक्तादन्यत्र नास्त्येव हेतौ कर्तुश्च कर्मता ।
पाचकाश्च पचन्त्यन्नं पाचकैः पाचयत्यसौ ॥ २५ ॥
क्राययत्येवं[11] शूद्रेणादाय यज्येष तेन वै ।
इत्येवभाऽऽदि बोद्धव्यमतुलमपि बालकैः ॥ २६[12] ॥

[Verse 27 is not in the text]

---

१ रावणो in (क) किन्तु " रावणं " इत्येव साधु. २ त्येयं in (क). ३ तथा in (क). ४ Śloka No. 18 is not here, the text of Śloka 18 in (क) is as follows यथासौ क्रन्दते सीता सीतापि क्रन्दयत्सौ also (ख) रामचन्द्रस्य विरह शं शब्दायतेरपि ॥ १८ ॥ ५ ण्यभि in (क) वाह in (ख) (ग). ६ पाथेयं in (क) (ख) (ग). ७ वा in (क). ८ मनुना in (क) ९ अभिवादयते in (क) (ख) (ग). १० वा in (क) (ख) (ग). ११ लंका in (क) किन्तुनेदं शुद्धम् । १२ व in (क) (ख) (ग) १३ Śloka No 27 is not here, the text of śloka 27 in (क) is as follows:—कर्म कर्त्ता यथा रामस्यौदनं न पच्यते स्वयं उक्तकर्त्ता यथा यथोरामोरावणंहन्ति सायकः The śloka No. 27 of (ग) is not in the original (अ).

अनुक्तकर्त्ता च यथा रामेण हन्यते रिपुः ।
सर्वत्र चोक्ते प्रथमा तृतीया अनुक्तकर्त्तरि ॥ २८ ॥
निवर्त्य च विकार्यं च प्राप्यं चेति त्रिधा भवेत् ।
कर्म तत् सप्तधा ज्ञेयमिप्सिता निप्सितादिना ॥ २९ ॥
अनिवर्त्यं हि यत्पूर्वतन्निवर्त्यमुदाहृतम् ।
यथा राम पठंतं तु तंतुवायः करोम्यहम् ॥ ३० ॥
घटयामि सुवर्णानि रामचन्द्रस्य कुण्डले ।
इत्यादि निर्वर्त्यमिदमनुक्तमपि चेप्सितम् ॥ ३१ ॥
विकृतं क्रियते यं तु तद्विकार्यमुदाहृतम् ।
रामकांडं लुनात्येष काण्डकारोऽति कोशली ॥ ३२ ॥
सिद्धमेवान्यथा यं तु प्राप्यते प्राप्यमिन्द्रियं ।
यथा स्मरामि रामं रामचन्द्रं भजाम्यहम् ॥ ३३ ॥
कन्दर्पशरमूढात्मा सीतां हरति रावणः ।
क्रोधान्धः खादति विषमिति प्राप्य मनीप्सितम् ॥ ३४ ॥
ईप्सितानीप्सितां प्राप्य यथा बालः क्षुधा कुलः ।
भुनक्ति सरजस्कान्नं फलं धूलीमलीमसम् ॥ ३५ ॥
कृष्णेन दुह्यते दुग्धं गौरेषा तु पयस्विनी ।
इदं चाकथितं प्राप्यमुक्तं चेत्येव गम्यते ॥ ३६ ॥
अप्रयोगमिति मतं यत्र देवाऽकथितं मतं ।
कर्तृकर्म यथा रामः सीतां कारयतीप्सितम् ॥ ३७ ॥
इति करणं द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा ।
शरीरावयवं यत्तत् तदाऽभ्यन्तरमुच्यते ॥ ३८ ॥

---

१ गेय in (क). २ वृतं in (क). ३ सुवर्णानि in (क) (ख) (ग). ४ विक्रियं in (क). ५ मीरितम् in (क). ३ च in (क). ७ नमाम्यहम् in (क). ८ क्रोधान्धः in (क). ९ क्षुधा in (क) (ख). १० दग्धं in (क) अयमयुक्तः पाठः । ११ मध्यन्तरं in (क). १२ मुदाहृतम् in (क) (ख) (ग).

तदभिन्नं बाह्यमाऽख्यातं तयोर्बाह्यं निगद्यते ।
रामो रावणमूर्धानं न्यकृन्तन्निनिशितैः शरैः ॥ ३९ ॥
अयोध्यां दोलया याति जानक्या सह राघवः ।
अभ्यंन्तरं यथा रामं मानसेन भजाम्यहम् ॥ ४० ॥
सीता विलोकते रामं नयनान्तेन[1] सस्मितं ।
सानुरागकटाक्षेण रामः सीतां विलोकते ॥ ४१ ॥

[Order of Stanzas 42-45 in अ is not clear]

संप्रदानं त्रिधा चोक्तं[2] प्रेरकं चानुमन्त्रिकम् ।
अनिराकर्तृकं चेति तत्र प्रेरकमुच्यते ॥ ४२ ॥
मुक्तिं भक्ताय रामोऽसौ ददाति करुणान्वितः ।
मह्यं मुक्तिं प्रदेहीति प्रेरणात् प्रेरकं मतम् ॥ ४३ ॥
अथानुमंत्रिकं किञ्चिदुच्यते तापसे वने ।
रामायातिथये दत्ते फलमूलं यथाविधिः[3] ॥ ४४ ॥
अप्रेरणात् प्रदत्तस्य चात्मनमन्त्रेण कर्मणा ।
अनुमंत्रिकं भवेदेतदति एककर्तृकं[4] यथा ॥ ४५[5] ॥
पञ्चोपचारं रामाय भक्तलोकः प्रयच्छति ।
अभिराकरणादेतत् तदनिराकर्तृकं यथा[6] ॥ ४६ ॥
अपादानं द्विधा प्रोक्तं चलं चाचलमेव च ।
चलापाङ्गानारीणां[7] निर्माति विषमं विषं ॥ ४७ ॥
अचलं तु यथा वृक्षात् पत्रं रामे पतत्यधः ।
हिमाद्रेरागता गङ्गा समुद्रात् रत्नमुत्थितम् ॥ ४८ ॥
चतुर्धा चाधिकरणं[8] च तत्राभिव्यापकं यथा ।
रामभक्ते भवेन्मुक्तिः सीतायां च पतिव्रताम् ॥ ४९ ॥

---

१ मसन्प्रतं in (क). २ प्रोक्तं in (क) (ख) (ग). ३ प्ययं in (क). ४ आमंत्रिकम् in (ख). ५ दनिएँ. ६ This stanza is No. 43 (Repetition here). But it is 44 of (क). ७ मतं in (क) (ख) (ग). ८ दपांगानारीणां in (क) (ख) (ग). ९ त्वाधिकरण in (क).

तदौपश्लेषिकं रामः श्रीरामे[1] सिंहासने स्थितः ।
सस्मितं वीक्ष्यते भूपो वैदेही शयनेस्थिता ॥ ५० ॥
अथ वैषयिकं रामोऽयोध्यायां वसति स्वयं ।
वने वसति शार्दूलः सिंहस्य गिरिगह्वरे ॥ ५१ ॥
अथ सामयिकं रामः कपिसैन्यसमन्वितः ।
अवात्सीत् सागरे घोरे गंगायां वसति स्वयं ॥ ५२ ॥
ननु संबन्धस्य किं न कारकत्वमिहोच्यते ।
कारकं हि क्रियाहेतोः[2] संबन्धस्य प्रधानता ॥ ५३ ॥
साक्षात् क्रियाभिसम्बन्धे कारकं हि विदुर्बुधाः ।
स्वातन्त्र्यस्य विवक्षायां स्थालीपतिसेवकः[3] ॥ ५४ ॥
पाचकः[4] पचतीत्यादौ यथाम्नातुं अतो भवेत् ।
न तथा कोपि संबन्धो यथा रामस्य सेवकः ॥ ५५ ॥

इति प्रबोधचन्द्रिकायां कृतौ बैजलभूपतेः समासासकसकलोकवश
कारकचन्द्रिका ॥ ५६ ॥

समासचन्द्रिका

समासाः[5] षड् विधो नाम्ना ज्ञेयस्तत्पुरुषस्तथा ।
कर्मधारयसंज्ञश्च बहुव्रीहिस्तथैव च ॥ १ ॥

---

१ श्रीमान् in (क) (ख) (ग). २ क्रियायोगे in (क). ३ स्थालीपचतीत्यादौः–पचति ओदनं in (ख) (ग). ४ पंचकः in (क). ५ सकथासाध्याषट् in (क). ६ Different reading in (क) यथा :—

स्यादिभिस्तद्धितैः कृदभिः समासैश्चाभिधीयते
यदेव कारकं तत्र प्रथमेवचनान्यतः ॥ १ ॥
उक्तानाँहि पदार्थानाँस्याद्यैः संख्येव गृह्यते ।
कृत्तद्धितसमासैश्च लिंगसंख्याविभक्तयः ॥ २ ॥

(*Continued on the following page*)

द्विगुद्वन्द्वोऽव्ययीभावः प्राधान्यं च चतुर्विधं ।
पूर्वोत्तरोभयान्येषां पदार्थानां विकल्पनात् ॥ २ ॥
तत्पुरुषो द्विप्रधानस्तत्र पूर्वप्रधानकः ।
प्रधानता[1] यथापूर्वं कायश्चापरकायवत् ॥ ३ ॥
अथोत्तरपदार्थस्य प्राधान्यरामसेवकः ।
द्विप्रधानस्तथाकर्मधारयोऽपि भवेद्यथा ॥ ४ ॥
रामः पुरुषसिंहोऽयं पूर्वप्राधान्यमीदृशं ।
नीलोत्पलं स्यादित्यादौ[2] चेत्यत्तरपदार्थता ॥ ५ ॥
द्विगुप्रधानो बहुव्रीहिन्यरन्यत्रचोभयत्रच ।
तत्राप्यन्यपदार्थे यत्प्राधान्यं तन्निगद्यते ॥ ६ ॥
स्मृतरामोऽहमनिशमुभयत्र पदार्थके ।
गुरोरादेशतो रामलक्ष्मणौ वनगामिनौ ॥ ७ ॥

[Verse 8 is not here]

उभयपत्र पदार्थे च प्राधान्य स्याद्विगोरपि ।
त्रिशृङ्गा पञ्चमूली चेत्यादि बोद्धव्यमुत्तमं ॥ ९ ॥
त्रिप्रधानोऽव्ययीभावपूर्वस्मिंऽच पदार्थकं ।
उत्तरस्मिंस्तथान्यस्मिन् प्राधान्यमिह सर्वतः ॥ १० ॥

(*Continued from the previous page*)

यथा रहसिरामेण सानुरागेणसादरं ।
पीयते प्रेयसी त्यधः सुधारस सहोदरा ॥ ३ ॥

This *Prakaraṇa* comes after तद्धित चद्रिका in the (अ)

In (क) after कारक there is *Prakaraṇa* dealing with स्यादि तद्धित कृदन्त etc. ; in the (अ) ... ... these things come after two *Prakaraṇas* viz. समास and *Taddhita*. in (क); the *Samāsa Prakraṇa* comes after the one dealing with *Syādi* etc.

१ प्रधानेन in (क). २ विशालाक्षि in (क) after पलं— ३ not in (क). ४ प्रधानता यथाद्वित्राः पंचषाः सप्तषास्थता. ५ द्वन्द्वे in (क) (ग) after च. There is some difference in the arrangement of stanzas 7 & 8. द्वे प्राधान्यमिष्यते in (ख) गुरोरदिशतोरामालक्ष्मणौ वनगामिनौ (ख) (ग).

त्रिप्रत्ययथोन्मत्तगङ्गादि शोभनः शशाभितिप्रकारेण ।
प्राधान्यं कथितं मया ॥ ११ ॥
समासांना पुनश्चैषां चातुर्विध्यं निगद्यते ।
स्यान्नित्यत्वमनित्यत्वं लुकचालुकमेव च ॥ १२ ॥
[Order of Stanza is not clear here]
तत्र नित्यसमासोऽयं कुम्भकारोत्रिखि वालकः ।
अनित्योराजपुरुषो राज्ञः पुरुष इत्यपि ॥ ॥
लुकसमासो यथा रामः स्मृतः पुरुषपुंगवः ।
अलुक समासश्चयथा कंठे कालोमहेश्वरः ॥ १५ ॥
अथ चैषां च समानानां भेदप्रत्येकमुच्यते ।
तत्राष्टधा च तत्पुरुषो विमक्ते श्चैव भेदतः ॥ १६ ॥
स्याद्प्रथमा तत्पुरुषः पूर्वकायोऽधरांगकम् ।
स्याद्द्वितीया तत्पुरुषो धन्यो रामाश्रितः पुमान् ॥ १७ ॥
स्यात्तृतीया तत्पुरुषोऽन्यथा धान्यार्थमिष्यते ।
स्याच्चतुर्थी तत्पुरुषो यूपदारु विराजते ॥ १८ ॥
स्यात्पंचमी तत्पुरुषो न मे शत्रुभयं क्वचित् ।
भवेत्षष्ठी तत्पुरुषो रामभक्तो भवाम्यहम् ॥ १९ ॥
स्यात्सप्तमी तत्पुरुषो भक्तिशौण्डोमुरद्विषः ।
नञ तत्पुरुषोह्येष यथानेको हरिप्रियः ॥ २० ॥
कर्मधारयएवं स्यात् सप्तधायं निगद्यते ।
विशेषण पूर्वपदो यथा नीलोत्पलं वरम् ॥ २१ ॥
विशेषणोत्तरपदो यथाशाद्विक सूचकः ।
विशेषणोभयपदो यथाशीतोष्णमुज्वलम् ॥ २२ ॥
उपमानपूर्वपदोरामः शूरोऽमरोत्तमः ।

---

१ In (क) and also in (ख) (ग) the reading is as follows :—
यथोपरामंतिष्ठाभिलक्ष्मणस्येदृशं वचः ।
उत्तरत्रयथानैवसंसारेऽत्र सुखं प्रति ॥ ११ ॥
अन्यत्र च यथोन्मत्तंगंगरक्षोऽतिशोभनः ॥ एषामिति प्रकारेण प्राधान्यं कथितं मया.

उपमानो हरोरामः चन्द्रः पुरुष केशरी ॥ २३ ॥
संभावना पूर्वपदो रामः शूरो भवाम्यहम् ।
अवधारणपूर्वपदो यथा रामधनं मम ॥ २४ ॥
सप्तधा स्याद् बहुव्रीहिर्द्विपदस्तत्र कथ्यते ।
प्रथमार्थं विहायाऽसौ भवेत् षट्सु विभक्तिषुच ॥ २५ ॥
समेऽनुरक्त रामोऽहं चिरसेवितराघवः ॥
उपनीतबली रामोऽयहं विगतकल्मष ॥ २६ ॥
कृतप्रमाणो[1] रामोऽयमित्यादौ द्विपदोभवेत् ।
अथोपदष्टदकैश्चिद् बहुव्रीहिर्निगद्यते ॥ २७ ॥
पराक्रमार्जितयशा रामचन्द्रो महीपतिः ।
सुग्रीव कृत सेव्योऽसौ विक्रमाहतरावणः ॥ २८ ॥
संख्योत्तर पदोप्येष बहुव्रीहिर्निगद्यते ।
उपविष्णोप्युपदेशोराममेवस्मराम्यहम् ॥ २९ ॥
संख्योभयपदौ द्वौ वा त्रयो वाद्विलारामानुवर्तिनः ।
सहपूर्वपदश्चायं[2] सानन्दो रघुनन्दनः ॥ ३० ॥
व्यतिहार स्वभावश्च यथा युद्धं न सम्मतम् ।
केशाकेशी सतां[3]ऽपि दण्डादण्डिसमीहितम् ॥ ३१ ॥
दिगन्तराल विषये यथादिक् पूर्वदक्षिणा ।
इयमुत्तर पूर्वास्यादियं दक्षिण पश्चिमा ॥ ३२[4] ॥
द्विगुद्विरेकभावी नैकवद्भावितान्वितः ।
आद्यो यथापंच फूली[5] त्रिगुटगी[6] च क्रतुग्रंथी ॥ ३३ ॥
यथा चनैकवद्भावी त्रिलोकाश्चतुर्दिशः ।
अथ द्वन्द्व समासश्च तृतीसनिगद्यते ॥ ३४ ॥

---

१ कृतप्रणामो in (क) (ख). २ पदश्चापं in (क). ३ सतानपि in (क) (ख). ४ Sloka No. 32 is not found in (ख). ५ पंचमूली in (क) (ख) इत्येवसाधुपदम्. ६ त्रिश्रृङ्गी in (क) (ख) इत्येवयुक्तपदमज्ञेयम्. ७ त्रयी in (क) (ख) इत्येव समीचीनपदम् न ज in (अ).

समुच्चयोऽन्वाचययो समासो नैव सिद्धयति ।
इतेरतरयोगोऽयं यथातौरामलक्ष्मणौ ॥ ३५ ॥
रामलक्ष्मणशत्रुघ्नाः जयन्तिरिपुमण्डलं ।
समाहारो यथा संख षटहं शोभतेऽधुना ॥ ३६ ॥
भेरी मृदंगमऽनिशं शब्दं जनयति स्फुटम् ।
द्विधास्यादव्ययीभावो नाम पूर्वपदोयथा ॥ ३७ ॥
न सुखं प्रतिसंसारे न स्वस्य प्रतिमेगृहे ।
स्यादव्ययपूर्वपदो यथा स्यादपतोरणम् ॥ ३८ ॥
अहर्निशं मम मन. तिष्ठस्यऽतिसुखान्वितः ।
इति प्रबोधचन्द्रिकायां कृतौ वैजलभूपतेः
समासासमासचन्द्रिका ॥ ३९ ॥

तद्धित चन्द्रिका

द्धि तास्त्रिविधा ज्ञेयाः केचित् सामान्यवृत्तयः ।
चिदव्ययसंज्ञकाश्च केचिद् भावार्थ वाचका ॥ १ ॥
ामान्यवृत्तयस्तत्र कथ्यन्ते केचनाधुना ।
दस्यास्तीति गुणवान् रामो गुणवतीप्रिया ॥ २ ॥
णवद्राघवकुलमेवं सर्वत्र बुध्यताम् ।
डालो रामचन्द्रोऽसौ चुलाडा[1] रामखमा ॥ ३ ॥
सलो रामचन्द्राय मांसलस्तुन्दिलस्तथा ।
मसः वामनः सीता लोमशा लोमशं कुलं ॥ ४ ॥
वेछला पदवी प्राज्ञो राम प्राज्ञीति तद्वधुः ।
प्राज्ञं रामलं[2] श्राद्धो चार्यो वार्तो द्वयः ॥ ५ ॥
रामोऽसौ दंतुरः सीता मधुरं राम भाषितं ।
सुसिरं जल पात्रं स्यात् सुखरो रामभक्तिभाक् ॥ ६ ॥

---

१ चुडालाराम वल्लभा. २ नित्यकुलम् in (क) (ख) भक्तैरर्च्योरघूद्वहः.

केशवो रामचन्द्रोऽयं केशवाराम[1] भ्रहत्रया ।
मणिदोरामभक्तोऽयं सीतेयं[2] च हिरण्यमयी[3] ॥ ७ ॥
रजस्वलेयं च कृषिवलो हे राम पयस्विनी[4] ।
धनीरामश्च धनिनी सीता च ततुकुली[5] ॥ ८ ॥
धनिको रामचन्द्रोऽयं धनिका धनिकं कुलम् ।
यशस्वी रामचन्द्रोऽयं जानकी च यशस्विनी ॥ ९ ।
मायावी रामणो[6] रामो मेधावी स्वग्वितत्कुलम् ।
मेषउर्णायुरेषस्याद् वाग्मी रामस्तु रावणः ॥ १० ॥
वाचालोऽप्यति वाचांगे वाचाला तद्वधूरलं ।
फलितो वृक्षरोषोऽत्र फलितारामवाटिका ॥ ११ ॥
बर्हिणोऽयं मयूरः स्याद् बर्हिणं तत्कुलं वरम् ।
शृंगारको वृषश्चैव धेनुः शृंगारिका तथा ॥ १२ ॥
शीतालू पुरुषस्त्री च शीतालुः कुलमुत्तमम् ।
एवमुषालुरेन्वष्टेा वातालश्च न शक्यते ॥ १३ ॥
तस्य चापत्यमित्यर्थेषु वाशिष्ठो भार्गवो मुनिः ।
वाशिष्ठी भार्गवी कन्या वाशिष्ठं भार्गवं कुलम् ॥ १४ ॥
एवं कौरव्यमित्यादि वोद्धव्यमपि सर्वतः ।
निवासार्थे जनपदेयाश्च माथुरास्तथा ॥ १५ ॥
स च अपत्यार्थे दाशरथि मारुती रावणिस्तथा ।
चार्टकैरश्च गौधारौ गौधरेः क्षत्रियस्तथा ॥ १६ ॥

---

१ केशवाराम वल्लभा in (क) (ख) (ग). २ रामोऽयं ८ in (क). ३ हिरण्ययवः in (क) ४ वधुस्मृता in (क). ५ धनि in (क) (ख). ६ रावणो in (क) (ख) (ग). ७ जानपदः in (क) (ख) (ग). ८ नाडायनाश्चाग्रायणोगार्ग्यौवात्स्यायनस्तथा in (क) आश्वलायन in (ङ)

This is number 15 of (क) – There is some difference in reading and the verse is also different.

वैनतेयश्च गाढ्रेयः स्त्रीभ्यः इत्यादयस्तथा ।
चाटकैश्च गौधाते गौधेाः क्षत्रियस्तथा ॥ १६ ॥

This is also in (ख) (ग).

कौरव्य[1] इत्यादि भवेद् भवार्थे तत्र कथ्यते ।
मूर्धन्यः कंठयओष्ठ्यश्च तालव्यादि शरीरतः ॥ १७[2] ॥
दुर्गन्धिश्च सुगन्धिश्च प्रतिगन्धस्तथैवच ।
फल्तिः पुष्पिता वृक्ष फल्तिा पुष्पिता लता ॥ १८[3] ॥
तदस्य जातीत्यर्थे नमस्कारकितं तथा ।
तेनख्यातो विचर्रते वित्तचञ्चु तथैव च ॥ १९[5] ॥
[Order of Stanzas irregular in defferent MSS]
अयमेषामतिशयेनेत्यर्थे कथ्यतेऽधुना ।
पटियश्च पटीयांश्च[6] सीता पटीयसी ॥ २० ॥
गरियांश्च गरिष्ठश्च प्रेष्ठश्च प्रेयांस्तथैवच ।
अयं पटुतरो रामस्तथा पटुतमोऽप्युयं ॥ २१ ॥
पटुकल्पः पटुदेशच पटुदेशीय इत्यपि ।
असमाप्तौ भवेदेवं प्रकारवचनेनतथा ॥ २२ ॥
पटुजातीयो मृदुजातीय इत्यादिकं भवेत् ।
प्रमाणे जानुदग्नं च जानुदघ्नमित्यपि ॥ २३ ॥
जानुमात्र जलमिदं जानुदग्नी नदीत्वियं ।
तत्र नियुक्त इत्यर्थे रामदौवारिकाः ततैः ॥ २४ ॥
दौवारिकी वरतनु द्वौवारिकमिदंकुलम् ।
येर्न दीव्यति तेनापि जयतीत्यर्थ गोचरे ॥ २५ ॥
अक्षिकादि भवेत्साधु संस्कृते दाधिकं भवेत् ।
सामान्य वृत्तयः प्रोक्ताः कथमव्ययसंज्ञकाः[10] ॥ २६ ॥

(This is 27 of अ)

---

१ गौकैरव्य in (क). २ No. 17 in (क). ३ This is not in (क). ४ वितचणो वितचञ्च तथैव च in (क) (ख) (ग). ५ This is No. 18 of (क). ६ रामः in (क) before सीता (ग). ७ जनः in (क) (ख) (ग). ८ तेन in (ख) (ग) इत्येव युक्तमपि. ९ जानाती in (क). १० कथ्यन्ते in (क) (ख) (ग).

यतः प्रभृति रामोऽयं सेवितश्चेतसामया ।
ततः प्रभृति कालस्य भीतिरुद्यते[1] नहि ॥ २८ ॥
यत्र रामस्य सेवास्यात्तत्र मंगलमिष्यते ।
अधुना सेव्यते रामः इदानीं सर्वदा तथा[2] ॥ २९ ॥
एतर्हि सर्वथारामः सेव्य इत्थं कथं पुनः ।
पुरस्तात् सेव्यतेरामः सद्य एवाद्य धार्मिकैः ॥ ३० ॥
पूर्वेद्युः सेव्यते रामश्चान्येद्युः सेव्यते मया ।
ऐषमश्चापरुच्चैव परारि निसेवितः ॥ ३१ ॥
उत्तरादक्षिणाच्चैव पश्चादुपरि[3] च स्थितः ।
उपरिचेष्टा पूर्वेण दक्षिणा दक्षिणानि च ॥ ३२ ॥
उपरिदक्षिण इत्यादि प्रत्ययो तर्हि चाव्ययं ।
द्विधाद्वैधं त्रिधात्रैधं नितरां सुतराम तथा ॥ ३३[5] ॥
अव्ययाः कथिताः एते कथ्यन्ते भाववाचकाः ।
पटुत्वं पटुता रामेगिरिमादृश्यते महान् ॥ ३४ ॥
शौर्यं धैर्यं च गाम्भीर्यं सौभाग्यं राम भूभुजि ।
स्तेयं च रावणे सख्यं कापेयं कपियूथका ॥ ३५ ॥
प्राजापत्यं पाशुपत्यं पौरोहित्यादयस्तथा ।
आश्वमौष्ट्रं च कौमारं रौखं द्वेहायनं तथा ॥ ३६ ॥
यौवन स्थाविरंच[6] वार्द्धकं मार्दवादयः ।
मनोज्ञकं बाहूलकं रामणीयकमेव च ॥ ३७ ॥

---

१ रुपपद्यते in (क) रुत्पद्यते in (ख) इत्येवसाधु । २ There is some minor difference in reading in (ख). ३ दुपरिस्तथा in (क) (ख) (ग). ४ पूर्वाचैवाप्य in (क). ५ There the reading in (ख) is विधाद्वैधंप्राजापत्यमाश्चापत्यं पौरोहित्यादयस्तथा । अव्ययाकथिताएते कथ्यन्तेभाव वाचका ॥ ३३ ॥ ६ वार्द्धक्यंचेव in (क) (ख).-

आचार्यकादयः प्रोक्ता भावाख्यास्तद्धितामया ।
अतः परं कृतं केचित् कथ्यंते[1] च प्रयत्नतः ॥ ३८ ॥
इति प्रबोध चन्द्रिकायां कृतौ वैजल भूपतेः ।
समाप्ताः सेयं विद्वद्भिः श्लाघ्या**तद्धितचन्द्रिका** ॥ ३९ ॥

उक्तचन्द्रिका

त्यादिभिस्तद्धितैः कृद्भिः समासैश्चविधीयते ।
यदेव कारकं तत्र प्रथमैवेनचान्यत[2] ॥ १ ॥
उक्तानां हि पदार्थानां त्यादिभिः संख्येव गृह्यते ।
कृततद्धितसमासैश्च लिंगं संख्या विभक्तयः ॥ २ ॥
यथा रहसि रामेण सानुरागेण सादरम् ।
प्रेयसी प्रीयते[3] वाचः सुधारस सहोदराः ॥ ३ ॥
द्विषं जयति रामोऽसौ रामैर्वा जीयतेरिपुः ।
सीतामुखेन जीयेते पूर्णेन्दु विकचाम्बुजे ॥ ४ ॥
रामोऽसौ कारक सीतां कारिका कारकं-कुलम् ।
अत्र कृत कर्तरीत्यस्य लिंगादिभजतेतराम् ॥ ५ ॥
रामश्च वैयाकरणः सवैयाकरणीवधूः ।
तद् वैयाकरणं सैन्यमित्थं भवति तद्धितः ॥ ६ ॥
कृतप्रणामो रामोऽर्थं कृत कृतप्रणामं तत्कुलम् ।
सीताकृतप्रणामेषा समासः कारके कृतः ॥ ७ ॥
कृतिर्विकृतिश्चापिस्यादुक्ताचेद्यदातदा ।
वाचकैः प्रकृतेः संख्या गृह्यते विकृतेनहि[4] ॥ ८ ॥

---

१ This is not in (क). २ चनान्यत्र in (क). ३ order changed in (क) पीयन्ते in (ख). ४ प्रकृति in (क) (ख) (ग).

जायन्ते तन्तवो राम पटः स्वर्णनिकुण्डले ।
क्रियन्ते रामचन्द्रस्य पच्यन्तेऽर्घैः[1] तण्डुलाः ॥ ९ ॥
तन्तवोरामचन्द्रस्य पटोभूताश्च तण्डुला ।
कृता ओदनमित्यादौ लिंगादिकर्मपिष्यते ॥ १० ॥
प्रधाने कर्मणि भवेद् वाचके हि द्विकर्मणि ।
अप्रधाने दुहादीनां हेतौ कर्त्तुश्च कर्मणि ॥ ११ ॥
अयोध्यां नीयते सीता रामेण गुणकर्मणि ।
रामोयंयाच्यते मुक्तिं मयासंसार भीरुणा ॥ १२ ॥
रामोऽयं याप्यतेऽपि भावनं शत्यहासात्मनः ।
गुरुणा भाष्यते शिष्यः शास्त्रं वा भोज्यते पयः ॥ १३ ॥
व्यवच्छेद्यं विशेषस्य स्यादवच्छेदकम् ।
न तु तद्[2]विशेषमाख्यातं रामोदाशरार्थीयदा ॥ १४ ॥
विशेष्यस्य हि यल्लिंगं विभक्ति वचनेचये ।
तानि कार्याणि योज्यानि विशेषणपदेष्वपि ॥ १५ ॥
यथा दाशरथी रामो मां रक्षतु समन्ततः ।
कौशल्या नन्दनं वंदे रामचन्द्रं कृपार्णवम् ॥ १६ ॥
शरण्येन च रामेण दुर्जनो रावणोजितः ।
जनकेन सुता दत्ता रामायवल्लशालिने ॥ १७ ॥
रामाद् वृध्यते कोदण्डाद् बिभेति युधिरावणः ।
रामस्य रावणानीककालस्य युधिविक्रमः ॥ १८ ॥
रामे विहरति[3] सीता विजयश्रीरऽहर्निशम् ।
जानकीवदनाम्भो जमधुपानं मधुव्रजे[4] ॥ १९ ॥
यत्रोद्देश्य विधेयत्वं तत्रापि नियमोनहि ।
स्यात्तदेवाऽजहल्लिंगम जहल्लिंगमऽजरद्वचनंचयत् ॥ २० ॥

---

१ रामतण्डुलाः in (ख) (ग). २ पतद्विशेषणं in (क). ३ स्फीता, ४ व्रते in (क) (ख) (ग).

रामभक्तिः प्रमाणं स्यात् करुणाभाजनंहरिः ।
मुक्तिक्षेत्रमियं काशिद्य जहल्लिंगमीदृशम् ॥ २१ ॥
रामदाराश्चसीतेयं स्त्रीयमक्षरसः खलु: ।
रामभक्तिर्मुक्तिगृहाद्य जहद्व्यंजनं त्विदम् ॥ २२ ॥
बहुव्रीहिसमासेहि स्वलिंगानि जहन्यपि ।
सर्वेशब्दा विशेष्यस्थं लिंगादिकमुपासते ॥ २३ ॥
अंगीकृतप्रमाणोऽयं रामोदीक्षित दारकः ।
अनादृतक्षरात्सोयमित्याधमऽवगम्यते ॥ २४ ॥
उपमानोपमेयत्वं स्याद् भेदलिंगसंख्ययोः ।
अभिन्नेव विभक्तिः स्यादुपमानोपमानयोः ॥ २५ ॥
लिंगभेदे यथा रामपत्नी मन्दागतिपरम् ।
मति मातंग इव सामंजवाक् परपुष्टवत् ॥ २६ ॥
यथावचनभेदे च कन्दर्प इव सुन्दरा ।
यूयं युवानो रामस्य भक्ता अहमिवोत्तमा ॥ २७ ॥
त्वां राममिव पश्यामि रामेणैवत्वया जिताः ।
दुर्जयाः शत्रवस्सर्वे रामायोर्वे[3] नमोऽस्तुते ॥ २८ ॥

---

१ Different reading in (क) is as follows :—

चतुर्धाशब्दप्रवृतिः । गुणनाति क्रियाभेदात् तत्तयत्रव्याक्ति परत्वं
नशब्दप्रवृतिस्तत्रायं नियमः ॥ २१ ॥
यच्छद्वयोगः प्राप्यम्यंस्यायुद्धेश्यस्य लक्षण ॥
तच्छब्दविकारश्चस्यादुपादि यालक्षणं ॥ २२ ॥
तथथा कालिदासः शैत्यंहियत्संकृतिर्जल्पस्य । and

then begin stanza No. 21 of the original in (क)

३ रामायोव इति पाठो न युक्तः,

त्वत्तोरामादिवांशेषारणे विभ्यति शत्रवः ।
रामस्येव तवैवेषा कीर्तिस्त्रैलोक्यगामिनी ॥ २९ ॥

त्वयि राम इव प्रीतिं भजन्ते सकला जनाः ।
एवं लिंगत्रयेऽपि स्याद् वचनत्रितयेऽपि च ॥ ३० ॥

विशत्याद्यासदैकत्व संख्या संख्येयसंखयोः ।
संख्यायन्ते यदासंख्यास्तदाद्वित्वादिकं भवेत् ॥ ३१ ॥

विंशति[1] रामभक्ताः स्युः विशतीरामभक्तयः ।
सहस्रं रामभक्ताः स्युः शतं रामस्य भक्तयः ॥ ३२ ॥

लक्षं च च रामभक्ताः स्युः[2] कोटीरामस्य[3]भक्तयः ।
यथा विंशतियस्तिस्रो रामभक्ताः शतानिर्च्चे ॥ ३३ ॥

चत्वारि भक्तयतिस्रःतिस्रः सन्येषु कोट्यः ।
समुच्चयेन[4] वा कंचित् बहूनां वाहवोश्रवाँः ॥ ३४ ॥

अंगत्वमाश्रितासंख्या वाचकानां विकल्पत ।
रामचन्द्रश्च सीता च वनं गच्छति गच्छतः ॥ ३५ ॥

रामः लक्ष्मणश्चापि भरतश्च प्रयाति च ।
प्रयान्ति च पुरीं स्वीयां जेताजेतारइत्यपि ॥ ३६ ॥

तेजस्विनस्तेजस्वीच गुणीगुणीन एव च ।
पुरुषेषु त्रिषु भवेद्यः एव पुरुषः परः ॥ ३७ ॥

---

१ " ती " इत्येव युक्तः पाठ. २ व्यावहारिक संख्यापरिज्ञानायं अयञ्च सर्वोपसुन्दरः पाठः उद्धृताः वैजलदेवेनेति मम विचारः. ३ रामविभक्तयः in (क). ४ Reading in (क) is as follows :—

संख्यायन्ते यदा द्वित्वास्तदाद्वित्वादिकंभवेत् ॥ ३५ ॥

५ begins श्रीरामश्चैव सीतायैचवनंगच्छतिगच्छतः रामश्चलक्ष्मणश्चापि भरतश्च प्रयांतिच 37, comes after 35 in (क) as 36.

६ not in (क) spirit of the (अ) 37.

समुच्चये सरावस्यात् संख्याचापि तदाश्रिता ।
यथारामश्चसीतेत्वं गच्छतेजीवनंवनम् ॥ ३८ ॥
रामस्त्वमऽहूयऽप्यगच्छावो गुरुशासनात् ।
अहं च त्वं रामश्च योगश्च त्रिविधा भवेत् ॥ ४० ॥
[Order of verse irregular]
मुख्यः सार्थेना संपन्नो अथोऽप्यन्यरघुद्वहः ।
गुणयोगाद् भवेत् गौणो रामक्रोधो विषं महत् ॥ ४२ ॥
रावणम्प्रतिकालोऽयं सिंहश्च करिणं प्रति ।
स्वार्थान्वधस्यवाधेन तात्पर्यस्यानुरोधतः ॥
लक्षणा कल्पते सापि द्विधास्यात् प्रयोगतैः ॥ ४३ ॥
जहत्स्वार्थाऽजहत्स्वार्था तत्राद्या कथ्यते मया ।
स्वार्थत्यागो भवेद्यत्र जहत्स्वार्थेति सा यथा ॥ ४४ ॥
रामो वसति पाथोधौ यमुनायां जनार्दनः ।
यष्टी भोजय स्वांगांश्च खड्वा वदति संसदि ॥ ४५ ॥
यत्र स्वार्थाऽपरित्यागोऽजहत्स्वार्था च सा यथा ।
क्षत्रिणो यान्त्यमीकाशीं काकेभ्यो दधि रक्षताम् ॥ ४६ ॥
पदार्थेऽप्यपदार्थेऽपि तात्पर्या लक्षणान्वयः ।
एवं सर्वत्र बोद्धव्यमनुरक्तमपि बालकैः ॥ ४७ ॥
जातिं व्यक्ति परत्वेन द्विधा शब्द प्रयत्ननम् ।
तत्र जाति परत्वेन यथा त्वं भोजयातिथिम् ॥ ४८ ॥
अत्रैकत्वमुऽतंत्रंस्याद् भोजनेन जातियोग्यता ।
ब्राह्मणान् भोजयेत्युक्तो श्रोतात्रीन् भोजयत्यसौ ॥ ४९ ॥

---

१ प्रथमादि क्रमादेव प्रतीयोच्चरितेऽपिच ॥ ४१ ॥ in (क) (ख) (ग)
मुख्योगौणो लाक्षणिकः प्रयोगस्त्रिविधेत विषमहत् ॥ Then begins No. 42 of (क) while this is 43 of our original (अ).
२ प्रयोजनं in (क). ३ षष्टी in (क) Verse 45 of the original (अ) is not in (ग). ४ जास्या in (क) (ग).

जातिं भोजयितुं नैव शक्नोमित्यवधार्यसः ।
त्रीनेव भोजयत्याऽऽश्रु तात्पर्याऽनवधारणे ॥ ५० ॥
तात्पर्यविषये शाब्दः प्रमाणमिति निश्चितः ।
श्रोता तदनुसोरण शाब्दबोधे प्रवर्तते ॥ ५१ ॥
विशेष्यक्रियया यत्स्यादुक्तं कर्मादिकं पुनः ।
विशेषण कियाऽप्याऽऽहत देवेति सुनिश्चितः ॥ ५२ ॥
यथा मुक्ता वनं रामं प्रयान्तिसहभार्यया ।
रामेण गम्यतेऽयोध्या वनाद्भुत फलानि च ॥ ५३ ॥
उक्तमेवोक्त तापानि क्वचिदुक्तमऽनुक्तताम् ।
अनुक्तमपि नोक्तं स्यात् क्वचिदेवपदान्तरैः ॥ ५४ ॥
ओदनः पच्यते हृष्टो मया सतपुरुषोऽप्यम् ।
आरुह्य वानरोवृक्षच्छिद्यतेदृश्यतेऽपि वा ॥ ५५ ॥
पटोऽयं शतिको भाति रामेण परिधीयते ।
कृदादिभियदेवोक्तं त्यादैरपितदेवहि ॥ ५६ ॥
नृत्यन्तं च नटो रामो विलोकयति कौतुकी ।
छात्रं च वैयाकरणं व्दान्यच्छति लक्ष्मणः ॥ ५७ ॥
आरुह्य वानरं वृक्षं रामः पश्यति सादरम् ।
कृदाद्यैर्नोक्तमे वै तदनुक्तं त्यादिना भवेत् ॥ ५८ ॥
नृत्यते गीयते रंगे नटेन स्थीयते क्वचित् ।
भोक्तुं पचति रामोऽयमोदनं सदृशं गतः ॥ ५९ ॥
रामभक्तः समानीय रामं पूजयति स्वयम् ।
इत्यादावुक्तमेवत्यादनुक्तमिति बुध्यताम् ॥ ६० ॥
कर्मजप्रत्ययेनान्यत् क्वचिदाप्युच्यते यथा ।
कृष्णेन दुह्यते गोभ्यो गवांगोषुवाथवापयः ॥ ६१ ॥

---

१ भुक्ता in (क) (ग).

मया प्रयाच्यते मुक्ती रामाद् रामस्य रामकं ।
याच्यते रामचन्द्रेण पाचकेनोदनोऽद्भुतः ॥ ६२ ॥
क्वचित् कालादिकं चैव सत्त्वेचान्यस्य कर्मणा ।
रामेण श्रुद्यऽऽतेऽ द्य च गीयते ॥ ६३ ॥
कान्तोऽनुगम्यते क्रोशं कान्तयास्निग्धचेतसा ।
अन्यस्य कर्मणोऽसत्त्वे कालाद्यऽप्याह कर्मजं ॥ ६४ ॥
कुम्भकर्णे न सुप्यन्ते रामासासम युभजा ।
वने द्वादश वर्षाणि स्थीयन्ते गुरु शासनात ॥ ६५ ॥
इति प्रबोधचन्द्रिकायां वैजल भूपतेः ।
इत्युक्ते चन्द्रिका सम्यक् समाप्ता च मनोहरा ॥ ६६ ॥

कृत चन्द्रिका

कृतस्त्रिष्वपि वर्तन्ते भावे कर्मणि कर्त्तरि ।
तत्र भावे यथा रामो विजयो त्रिनयस्तथा ॥ १ ॥
नरोदो नसरैश्चापि विग्रहो न च निग्रहः ।
आदराद्यास्तथाभागो यागो त्यागादयस्तथा ॥ २ ॥
पचनं तरणं ज्ञानं पवनं कारणादयः ।
भुक्तिर्मुक्तिः कृतिश्चैवगीतिरित्यादयस्तथा ॥ ३ ॥
पारणा वेदनेत्यादि चिकिर्षेत्यादि च स्त्रियाम् ।
जिगीषा रामचन्द्रे च बुभुक्षा बानके तथा ॥ ४ ॥
छिदामिदाविदाश्चैव जरा प्रभवतयः स्त्रियाम् ।
अथ कर्मणि भावे च कथ्यन्ते केचनाधुना ॥ ५ ॥
सकर्मकात् कर्मणि च तीर्णो रामेण सागरः ।
निर्जितो रावणो वैरी सीता नीता पुरीनिजाम् ॥ ६ ॥

---

१ नोयो दमशमश्चापि निग्रहो विग्रहस्तथा । in (क).

भावे[1] यथाऽकर्मकेभ्यः स्थितंरामेण काननेे ।
सुप्तंभूमौ निशि सदा रमितं तेन सीतया ॥ ७ ॥
अयोध्यां च गतोरामः कर्त्तरीत्यादिगम्यतां ।
तव्यादयः कर्मणि च भावे च निवसत्यमी ॥ ८ ॥
तत्र कर्त्तरि वा ठाष्ठी दृश्यते तदुदाहृतिः ।
लंकां रामेण गन्तव्या रामस्य च महीपतेः ॥ ९ ॥
गन्तव्य रामचन्द्रेण स्यातव्य च मयाऽत्रहि[2] ।
दर्शनीया च रामेण रामस्य च कृशावधुः ॥ १० ॥
ध्येयं रामपदाम्भोजं मया मम च सर्वदा ।
रामनामामृतं थेयं गेये च गुण कर्मणि ॥ ११ ॥
रामस्तुत्यो मया नित्यं मम चापुण्यकर्मणः ।
रामसेवा मया कार्य्या मम वा पुण्य कर्मणः ॥ १२ ॥
इषत्कैरामयारामभक्ति स्यात्दुष्करापरः[3] ।
रामस्यानुग्रहात् स्वर्गः सुप्राप्योनाऽत्र संशयः ॥ १३ ॥
सुपानं भक्तिभावेन रामनाम मृतं मया ।
त्रिषुगत्यर्थ कादिभ्यः कोभवेदादिकर्मणि ॥ १४[4] ॥
गतं वनं रामेण रामचन्द्रो वनं गतः ।
गतं रामेण कृतिनेत्येवं गत्यर्थधातुषु ॥ १५ ॥
अकर्मकेषु यथाग्रीष्मेशुष्कोह्रदोऽप्यधुना ।
शुष्कं ह्रदेन शुष्कोऽयं ह्रद सूर्येण भानुना ॥ १६ ॥
आश्लिष्टो रामचन्द्रेण सानुरागेण जानकी ।
अश्लिष्टो रामचन्द्रेणसौ रामेणश्लिष्टमित्यपि ॥ १७ ॥

---

१ भावे प्रत्ययाधर्मवाचकानुधर्मवाचकाः in (क) ॥ ७ ॥ २ मयावनी in (क). ३ इत्युक्तेः in (क). ४ No. 15 of (क) is सुपानं भक्तिभावेनरामानामृतं मया ॥ १५ ॥ This is 14 of the original in (अ).

सीतायाचोपशयितो रामः परमधार्मिकः ।[1]
रामेणोपस्थितं चैवमनुक्तामपिबुध्यताम् ॥ १८ ॥
रामेणोपासितं नित्यं रामश्चोपासितोगुरुम् ।
रामेण गुरुभक्तेन चिरं गुरुरुपासितः ॥ २० ॥
वनमध्युषितोरामो रामेणाध्युषितं वनं ।
रामेचार्ष्युध्युषितमेवं बोद्धमुत्तमैः ॥ २१ ॥
उपजातः सुते पित्राचोपजातः सुतंपिता ।
उपजातञ्च पित्रेति सर्वत्रपरिबुध्यताम् ॥ २२ ॥
वानरो वृक्षमारुढ आरुढं चामरोत्करैः ।
आरुढो वानरेणासौ रसालः फलसंयुतः ॥ २३ ॥
सीतानुजीर्णा रामेणासौऽनुजीर्णा प्रियसतीं ।
अनुजीर्णं च रामेण त्रिषुरुपमिदं भवेत् ॥ २४ ॥
त्रिष्वादि कर्मणि यथा प्रभुक्तं रामभूमुजा ।
प्रभुक्त ओदनं रामः प्रभुक्तो वरमेमोदनम् ॥ २५ ॥
अकर्मकात् समुत्पन्नो वर्तते कर्त्तृ भावयोः ।
श्रद्धा नदी च शरदि शुद्धं नद्येत्युदाहृतैः ॥ २६ ॥
अथ कर्त्तरि कथ्यन्ते कृतः केचन सम्प्रति ।
निराकरिष्णुः सकलं वैरिणं रामभूपतिः ॥ २७ ॥
हतवान् रावणं रामः कृतवान् कर्म दुष्करम् ।
देव कार्य्याणि कर्त्ताऽसौ रामचन्द्रो गुणाद्भुतः ॥ २८ ॥
रामकृत्यविदर्थ विरिमिः क्रोधजितसदा ।
रामकीर्ति प्रसृमरा रामोऽयं शत्रुधस्मैरः ॥ २९ ॥
जल्पाकश्च वराकश्च रामभीत्याऽहरावणः ।
त्रैलोक्य नन्दनोरामः करग्राही समुद्भवः ॥ ३० ॥

---

१ रावणाध्युषितमेवं बोधव्यमुत्तमैः in (क). २ Sloka No. 26 is added in the foot-note.

रामानन्दोसमानुजातोरामोजिगमिषुर्वनं ।
यशोभिलाषकोरामोरावणं पातकं परम् ॥ ३१[1] ॥
रामाज्ञायावनचरः कपिलंका [2]चरः कृती ।
सीतामुखाम्बु जमधुपोरामोऽभीष्टप्रदोभुवि ॥ ३२ ॥
उक्त्वा ददोमाएवंस्युर्यथा भोक्तुं व्रजत्यसौ ।
भुक्त्वा व्रजामि नगरं भोक्तुं गच्छामि मन्दिरम् ॥ ३३ ॥
विहायराज्यं रामेणागम्यते वनमद्भुतं ।
रामो हसन वनं याति हसन्त्यासीतयासह ॥ ३४ ॥
गुरुणादृश्यमाणेन रामेणगम्यते पुरी ।
सीतां विलोकयामासु रामो नाप्नोति पीडनं ॥ ३५ ॥
इत्यादि कृद्बोधव्यं वृद्धैरुक्तानुसारतः ।
इतिप्रबोध चन्द्रिकायां कृतौ वैजलभूपतेः ।
समाप्तेचमष्टीत चन्द्रिका मिष्टार्थ साधिका कृतचन्द्रिका ॥ ३६ ॥

सन्धिचन्द्रिका

अथ बा[3]लबोधाय संधिः सम्यक् विविच्यते ।
रामच्छलं हरिच्छाया विश्मृच्छद्म गुरुच्छविः ॥ १ ॥
रामोम्लें[4]च्छान् समाच्छिद्य सीताच्छायामवेक्षते ।
अग्रिमस्य छकारस्य द्वित्वमित्यवधार्यताम् ॥ २ ॥
अथ प्रयत्नेन मया स्वरसन्धिर्विविच्यते ।
रामचार्यस्ति मध्यास्ति जानक्येषा पतिव्रता ॥ ३ ॥

---

१ Different hand writing in (क) with different ink.

२ कपिलो वानरः कृतिः in (क). ३ बालकबोधार्थं in (क). ४ After the stanza the following of (क) is not in the original (अ). अत्रामुष्यच्छकारस्यद्वित्वमित्यवधार्यताम् in (ख) but not in (अ) and also in (ग).

मध्वानन्दो मात्राकांक्षी वेतीत्यादौ यणाकृते ।
यरोद्वित्वं यथा पक्षे दध्यास्ते मध्वनुत्तमम् ॥ ४ ॥
जानक्येषा मात्राकांक्षि[1] पक्षे प्रकृतिवदयथा ।
दधिआस्ते मधुअन्नं मधु आनन्द ईदृशः[2] ॥ ५ ॥
मातृ आकांक्षितमिदं मातृइत्यादिकं भवेत् ।
यणोमयोद्वे भवतः इति पक्षे निगद्यते ॥ ६ ॥
दध्यास्ते राममध्वत्र जानक्यायान्तिसम्प्रति ।
मध्वानन्दो मात्राकांक्षि इतिपक्ष चतुष्टयम् ॥ ७ ॥
नयनं पवनं चैव पाचैंक[3] पावकस्तथा ।
तवेयं रामसीतेच्छा तवोदकमास्थितम् ॥ ८ ॥
रामसीतास्ति सीताद् वा रामाकारो विराजते ।
तवैषा रामसीतेव चँरं[4] रामतवोहनम् ॥ ९ ॥
सीतौहितेदिकेषु वृद्धिर्भवति निश्चितम् ।
रामाग्रतश्च सीतास्तदंधीदं जानकी हते ॥ १० ॥
मधूत्तमं वधूत्कृष्ट स्तनौ[5] भातः पितृमँषः[6] ।
मातृकार इत्यादौ हि सवर्ण दीर्घ इष्यते ॥ ११ ॥
मित्रे तिष्ठच्चिरं विघ्नोयम यङुँः[7] कृते परम् ।
इत्यादावति सर्वत्र एहीत्यपरमाषितः ॥ १२ ॥
यशेतँ[8] च विघ्नमः इह इत्यादौ लोप इष्यते ।
कदादेशे कदुष्णं च कवादेश कवोष्मवत् ॥ १४ ॥

---

१ कांक्षा in (क) (ख). २ दधि आस्ते मधुस्ते in (क) (ख). ३ चषकेः in (क) चायका in (ख). ४ वत in (क). ५ स्तनाभावः in (क) (ख). ६ षमः in (क) (ख). ७ यदत्कृत्यं in (क). ८ थशे च विद्व in (क) विष्णुः in (ख). ९ After this in (क) There is :— विकल्पेन यमेतच्चभवे द्विष्मविहेत्यपि ॥ १३ ॥ दशरर्थेषु शब्दस्य कादेशे कोष्म इष्यते । also in (ख) also in (ग).

गोशब्दस्या वडिन्द्रेस्योद् गवेन्द्र इति कथ्यते ।
गवाश्वं च गवोष्टं च गवोदनमिति त्रयम् ॥ १५ ॥
केचिद् गोश्वं गवुष्टं च गवोदनमिदं विदुः ।
प्रौढः प्रौढिस्तथा नैषः प्रेष्यस्तु खलवृद्धि भाक् ॥ १६ ॥
प्रार्णव वत्सतराणवं च कम्वलार्णं तथैव च ।
वशनार्णमृणांच दशार्णा वृद्धि भाक् भवेत् ॥ १७ ॥
अघोटो[1] च कबोठा च कोऽयदत्रगुणोभवेत् ।
स्वैरं स्वैरिणी वृद्धिः स्यात् स्वरसंधिरुदाहृतेः ॥ १८ ॥
अथ प्रकृतिवद्भावः कथ्यते तु मयाऽधुना ।
लक्ष्मण उपैहीति सीतै आर्दतत्वरम् ॥ १९ ॥
रामाक्षौहिणी इमे राम बाहु उक्तमशोभिनौः ।
रामनेत्रे इमे राम्ये राजीव इव राजतः ॥ २० ॥
मणीपदं पतं विनिषेधकस्यचिन्मते ।
इवार्थे च वकारोऽयमिवाकरोऽमिवाकस्यचिन्मते[2] ॥ २१ ॥
अमी अत्रेति नो संधिर्बहुत्वेऽमी निगद्यते ।
अश्रैवोहि इ इन्द्र च उ उतिष्ठादिकेषुच ॥ २२ ॥
एकस्वरे निपातेच न संधि बुध्यताम् ।
अहो आहो उताहो च निपातोनात्रसंधिभाक ॥ २३ ॥
आकारे नैवसंधिस्यात् वाक्यस्मरणायोर्यथा ।
आ एवं मन्यसे राम आ एव मिति वै किल ॥ २४ ॥

---

१ अघोटो in (क) अघोठा in (ग). २ Here the difference is — इवार्थे तु व शब्दो वाचाशब्दोवा भवति क्वचित् । ३ अ अपेहि in (क) (ख).

इषदर्थे क्रियायोगे त्वेमेहि च ।
मर्यादायां फलंचाग्र्यात्तौचैवात्रसंपदः ॥ २५ ॥
हिमकृतौवारिक्षद्धिरित्यादौ कस्यचिन्मते ।
न संधिरिति जानीहि व्यंजने संधिरुच्यते ॥ २७ ॥
[Order of stanza is irregular]
वर्गप्रथमवर्णानां पदान्तानां तृतीयया ।
घोषवत्सुस्वरे चैव भवन्ति नहिसंशयः ॥ २८ ॥
पंचमे पंचमावास्युस्तृतीयाश्चेति निश्चितम् ।
सौभाग्यभागसौरामो वा जिगमिषुररिव्रजम् ॥ २९ ॥
अजंताः व्रजंताः शब्दास्तद्गते वागनुत्तमम् ।
वाङ्नीतां वाग्मिता तन्मात्र वाङ्मात्रमेव च ॥ ३० ॥
तन्निद्रा रामनमिदं तदगीतारामन्मयं ।
वाङ्मात्रं राम तन्मात्रमेवं सर्वत्रबुध्यताम् ॥ ३१ ॥
हकारस्य चतुर्थं वा सम वाग्घोरस्य संयुता ।
अज्झलौ षड्सन्निवाससद्धविसध्दुताशनः ॥ ३२ ॥
शकारो वा छकारः स्याद्राम वा कूर्लऽमनाधुना ।
वाक्छेयोराम षट् छायामस्तच्छेष्ट वाच्छुतं तथा ॥ ३३ ॥
वाक्छलक्षणाराम वाक्श्लक्षणातु तच्छोकश्चतथैवहि ।
पक्षे शकारः सर्वत्र ज्ञेयः शाब्दिकसत्तमैः ॥ ३४ ॥

---

१ Not in (क) There is a difference in reading also in (ख) (ग)
ईषदर्थे क्रियायोगे मर्यादामिविधौ च यः ॥ २४ ॥
एतमातं ङितं विद्यात् वाक्यस्मरणयोरङीत् ॥
ईषदर्थे कृजतं चास्ते क्रियायोगे तमेहि च ॥ २५ ॥
then comes 26 of the (अ). २ Stanza 28 of this is not in (क ३ षङ्गंता in (क) (ख) (ग). ४ तद्भिदा in (ग). ५ रामघेहावाद्याहास्यहैसंयुत ॥ ३० ॥ अकुङ्थुत्तौसद्संतिचमदगतं चापि दत्तम् in (क) (ख). ६ वाकद्दोमना in (क) (ख) (ग).

स्वरे तृतीयं जानीहि रामं वागति कोमला ।
वागुत्तमा रावणस्यैषा वागेषा मधुरा तवा ॥ ३५ ॥
अजयं षंडिति ब्रूहि तदिति वागितिस्वयं ।
एवं बोद्धव्यभरी वीलमऽनुक्तमपि बालकैः ॥ ३६ ॥
ह्रस्वोपाधाङ्श्चनणो भजन्ति द्वित्वमेवहि ।
कुड्त्र सुगणत्र भवन्नत्रेति तत्परम् ॥ ३७ ॥
चवर्गे च टवर्गे च लकारे च तथापरे ।
पररुपं तकारस्य कथ्यन्ते तदुहाहृते ॥ ३८ ॥
रामस्तच्चरति श्रीमांस्तच्छत्रं कदाचल ।
तज्जातं तज्जकरिण तट्टीकातट्टकारवत् ॥ ३९ ॥
तड्डीनो विस्तंडकारस्तहच्च कारश्चतहयधुः ।
एवं सर्वत्रबोधव्यं विशेषेणापि बालकैः ॥ ४० ॥
न कारस्यपदन्तस्य सकारोविन्दुसंयुतः ।
चछयो जायते नित्यं कथ्यते तदुदाहृतिः ॥ ४१ ॥
श्रीमांश्चरति रामोऽयं भवांश्चक्षयतिद्विषः ।
षकारो विन्दसंयुक्तष्टटयोः च निगद्यते ॥ ४२ ॥
भावांष्टीकते रामो भवांष्ट करणं चहि ।
तथयोश्च सकारः स्याद् भावांस्तरतिससागरम् ॥ ४३ ॥
भवाँस्तथा महाप्राज्ञो यथारामोरवूँद्वहः ।
पक्षेऽनुस्वारहीनस्य भवांश्चरति सर्वशः ॥ ४४ ॥
प्राशाञ्चिनोति मात्रास्यान्निषेधो गन्थकारिणं ।
वाञ्छेते प्रभृतिषुशिलकुपक्षे च पूर्ववत् ॥ ४५ ॥

---

१ प in (क). २ तडीवो तडीवोनोस्तडुकारस्तल्लकारश्च तल्लघुः in (क) (ख).
३ मनुकामपि in (क) (ख). ४ रघूत्तमः in (क).

भवाच्छूर[1] इत्यत्र च नष्टौ तुग्वधीयते ।
रामत्वं हसतीत्यादौ **मोऽनुस्वारो** विधीयते ॥ ४६ ॥
त्वङ्करोषि प्रभृतिषु विकल्पं वर्गपञ्चमः ।
न्यंय्यं[2] चेत्यादिषु द्वित्वे विभाषासानुनासिकम् ॥ ४७ ॥
तवर्गस्य लकारे च पररूपं विधीयते ।
तद्दुनाति[3] रिपौ सैन्यमवाँदित्रखतिसाम्प्रतं ॥ ४८ ॥
कथ्यन्तेऽथ विसर्गाणां संधि शेषेचसेतथा ।
विसर्ग पररूपत्वं भजति हविषा यथा ॥ ४९ ॥
रामः शेते चिरं राम षाड्गुण्य मनुमोदते ।
रामः सहायो मे भूयादेवं सर्वत्र बुध्यताम् ॥ ५० ॥
यथा सकारश्चच्छयोरामश्चरति काननम् ।
रामः च्छाया समायुक्ता इत्यादि स्वयमुह्यताम् ॥ ५१ ॥
टे टे सकारश्चयथारामः ष्टीकाविशारदः ।
रामश्च कुरु एवात्र करवयो पफयोस्तथा ॥ ५२ ॥
वा सकारो यथा रामः करोति सुकृतं महत् ।
रामः खड्गधरो धीमान् रामः पतिपायसं ॥ ५३ ॥
रामः फलनिक्षिप्तं ते दण्डिकायां वुभूक्षितः ।
निष्कृतं दुष्कृतं चापि नि कृतं दु कृतं यथा ॥ ५४ ॥
बहिष्कृतं च दुखेन कृच्छ्रेणान्यत्र चेष्यते ।
तिरस्करोति वा सत्वं कारका **नाम्रेडितस्त्वतः** ॥ ५५ ॥
डत्वं चाकारयोगेन यथा रामोऽत्र वर्द्धते ।
उत्वं रस्य च प्राप्नोति पुनरत्र निगद्यते ॥ ५६ ॥
रामोहसतिरामोऽज्य मित्यादौ चोत्वमिष्यते ।
राम आयाति नगरं श्रीराम इह तिष्ठति ॥ ५७ ॥

---

१ श्चुना श्चु in (क) (ख). २ त्वञ्च तत् in (ख). ३ तल्लुनाति in (क) (ख) (ग). ४ भवांल्लिरवति in (क) (ख).

राम उत्तम सौभाग्येन राम क्रृच्छति साम्प्रतं ।
राम आकार सुभगो राम राजिवं नाङ्क्ते ॥ ५८ ॥
राम औद्धत्यरहित इत्यादौ लुम्विधीयते ।
मत्ते च कस्यचिद्यत्वं रामायेति च तद्गृहम् ॥ ५९ ॥
रामायाऽऽयान्ति सदनं रामायान्ति निजालयम् ।
इत्यादौ लोप एव स्याद् भो गच्छेत्यादिषु ध्रुवम् ॥ ६० ॥
स्वरे भो यत्र भोऽयत्र भगो इह भगो यिह ।
अधो एहि चाधोयेहिमवन्नेहविमायथा ॥ ६१ ॥
भगवन्नऽत्र भवन्ति अधवन्नऽत्र मन्दिरे ।
अधो भवति सलोपः कार्यं कुरु सम्प्रति ॥ ६२ ॥
श्रीहरिर्गच्छतीत्यादौ रेफएवविधीयते ।
हरिस्त्रिविस्तुरंसावित्यादौरेफएवहि ॥ ६३ ॥
मे मांतारमते रामे हरी रामोऽस्ति मानसे ।
विष्णुरमयतिस्वान्तमित्यादौरेफमृगैत्रवेता ॥ ६४ ॥
पूर्वस्वरस्यदीर्घत्वमेवं सर्वत्र बुध्यताम् ।
रेफप्रकृति शब्दानां विशेषो दाहियते यथा ॥ ६५ ॥
भातर्याहि पुनर्याहि शतं याहि गृहं प्रति ।
धातर्गच्छ पुनर्गच्छ रामोयातीतिमिदंभाक् ॥ ६६ ॥
रामोजपत्स्त्रेति विशेषा श्रुतिमो महान् ।
ए ऐ ओ औ प्रभृतिषुरेफलोप परं भवेत् ॥ ६७ ॥
रामोरम्यं वनं जगम विस्तारोऽचिः प्रतीक्ष्यताम् ।
गोरेम्येत्यादित्रोधव्यं परत्वाच्च मनोरथः ॥ ६८ ॥

---

१ जिघ्रति in (क). २ रामरात वनाद्गृहे in (क) (ख). ३ वनाद्गृहं in (क). ४ Sloka No. 70 in (ख) is असौ रामो वने ह्यस्तु श्वासकः सुखदः सहि-सरामो नत्र् समासे जकप्रत्यये नहि ॥ ६८ ॥

व्यञ्जने चैष परोलोपराच विधीयते ।
स चैष नञ समासेषुच विधीयते ॥ ६९ ॥
असौ रामोवतेषश्चसकार कुकराचहि ।
ग्रन्थस्य गौरवभयान्मयानोक्ति सविस्तारयैः ॥ ७० ॥

इति श्रीप्रबोधचन्द्रिकायां च कृतौ वैजलभूपते एस एषादिशेष सुभगा समाप्ता संधिचन्द्रिका सम्वत् १९३२ मि० पु० कृतइदं पुस्तकं नवल किशोरेण लिखितं वृन्दावनमध्ये

परिशिष्ट

(Appendix—Commentary on the *PC* by Gopālagīri-known as *Subodhinī*-incomplete in two Folios-Nos. 41 and 42 of the *MSS* (घ)-

अथ प्रबोधचन्द्रिकायाः सुबोधिनी टीकाप्रारम्भः

श्रीगणेशायनमः ॥ श्रीमद्विनायकेशायवागीशायदयालवे । उमांकवामभागाय दक्षिणाभूर्त्तयेनमः ॥ १ ॥ अस्मदीयं गुरुंनत्वा.....षड्गुणान्वित । बालानां-सुखबोधाय कुर्वे टीकां सुबोधिनीं[1] ॥ २ ॥ श्रीर्विद्यतेयस्यस श्रीमान्, श्रीमच्चासौ विनायकश्च श्रीमद्विनायकः । श्रीमद् विनायकस्यईशः श्रीमद् विनायकेशः तस्मै श्रीमद् विनायकेशाय । विनायक शब्देन गणेशोबोध्यः । पक्षे विशब्देन गरुडः तस्यनायकः विष्णुरिति विनायकः ईश शब्देशिवः । विनायकस्य ईशः विनायकेशः तस्मैः । वाचांईशः वागीशः तस्मै० । दयाविद्यते यस्य सदयालुः तस्मै दयालवे ॥ उमा अंके चिह्नं वाममागे यस्य सः उमां कवाम भागः तस्मै उमीकवाम भागाय ।

---

१ बहुस्थले व्याकरण लेखकः भूयति वैजलदेवः गोपालगिरिनाम्ना टीकाकारश्च अनुस्वारस्याविचारेणैव अनुस्वार प्रयोगं कृतवान् तत्तु न युक्तम् इति मदीय विचार ।

उमा अंके यस्य स उमांकः उमांकश्चासौ वामभागश्च उमांक वामभागः । तस्मै उमांक वाम भागाय । दक्षिणाभूर्त्तयेः नमः ॥ रजतादौ श्रीकैलाशेवटमूलान्तरे श्रीभगवतः मूर्तिः पञ्चमुखात्मिका स्थिता तत्र दक्षिणदिशि सन्मुखत्वेन मत्वेन सनका दिशिष्टेभ्य उपदेश करणाय मूर्तिरिति दक्षिणामूर्त्तिः तस्मै० नमः १ सर्वविद्या-प्रवर्त्तकेन १ । हरिहर गुरुभक्तः सर्वलोकानुरक्तस्त्रिभुवनगत कीर्तिकान्त कंदर्प-मूर्तिः । रणरिपुगणकाले वैजलक्षोणीपाले जयति जयतिदातासर्वकर्मावदाता ॥ १ ॥ अस्मदीयमिति — अस्माकमिति अस्मदीयान् गुरून् श्रीशंकराचार्यादीन् कथं भूतान् तान् ब्रह्मविद्य प्रवर्तकान् ब्रह्मविद्या सूत्रभाष्यादिग्रन्थप्रवर्तकान् । का ब्रह्मविद्या सत्यं ज्ञानमनन्तं ब्रह्म । आत्मावारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदि-ध्यासितव्यः । एवं भूतान् गुरुन्नत्वा प्रवोधचन्द्रिकायाः सुबोधिनीं नाम टीकां अहं गोपालगिरि नामधेयः कुर्वेनाम करोमि । कस्मै प्रयोजनाय बालानां शब्दार्थ शब्दज्ञानरहितानां सुखबोधाय अनायासेन बोधाय करोमि । हरिहर गुरुरिति॥ हरिश्च हरश्च गुरुश्च हरिहर गुरुव तेषां भक्तः । सर्वेच ते लोकाश्च सर्वलोकाः । लोकस्तुभवनेजने इत्यमरः । तेषु अनुरक्तः प्रियः ससर्व लोकानुरक्तः । त्रिभु-वनेषु गताव्याप्ता कीर्तिर्यस्य स त्रिभुवनगतकीर्ति । कान्तत्वेन रमणीयत्वेन कन्दर्प-वन्मूर्तिर्यस्य सकान्त कन्दर्प मूर्तिः । कन्दर्पो दर्पको ऽनङ्गः कामपञ्चशरः स्मरः इत्यमरः । रणेषु युद्धेषुरिपवः रण रिपवः रणरिपूणां गणाः रणरिपूगणः तेभ्यः कालः रणरिपूगणकाल । सर्व कर्म शुद्धो वैजलक्षोणीपालो नामजा अवदातः सितो गौरो-बलक्षोधवलो ऽर्जुन इत्यमरः । अत्यादेर वाप्सा । ददातीति दातादानशीलः सर्वकर्मा-वदाता वैजलक्षोणि पालो जयति नाम सर्वोत्कर्षेण वर्तते ॥ १ ॥

" चन्द्रावती वदनचंद्र चकोरधीरः विक्रमात्यदेव तनयोनय तन्भवेता चोहान[1] वंश तिलकः पटनाथोराजापरं जयति वैजल देवनामा ॥

चन्द्रावतीति । चद्रावत्या वटन्मेवचन्द्रः चन्द्रावती वदनचन्द्रः चंद्रावती वदन-चन्द्राय विलसितुं चकोरः चन्द्रावतीवदनचन्द्रकोरः सचासौ विक्रमादित्यदेवश्चेति

---

1 There is no चोहान in (क) (ख) (ग) (घ).

चन्द्रावतीवदन चंद्रचकोर विक्रमादित्य देवस्यतनयः । चंद्रा० कथभूतः सनय तन्त्रवेत्ता नीतिशास्त्रवेत्ता ज्ञाता । पुनः कथंभूतः सः चौहानां[1] वंशतिलकः । तेषु मुख्यः । पुनः कथंभूतः स पटनाराज्य नगरस्याधीशः स्वामी । एवं भूतः सः राजा परं केवलं जयति बैजलदेवनामा राजा जयति सर्वोत्कर्षेण वर्तते ॥ २ ॥

रामः मे मम अभिहितं .... करो तु सततं निरंन्तरं । रामः प्रथमात्रकारको बोध्यः स च कर्तरि ॥ १ ॥ अहं आदरेण सहितं सादरं यथास्यात्तथा रामं भजेभजामि । अत्र कर्मणि द्वितीया बोध्या ॥ २ । समस्त दुरितं पापं रामेण अपहृतं दूरीकृतं भवति । **रामो मे भिहितं करोतु सततं रामं भजे सादरम् । रामेणापहृतं समस्त दुरितं रामाय दत्तं धनुः । रामान्मुक्तिरभीप्सिता-सरभसं रामस्य दासो–स्मय हं रामे रंजतु मे मनः करुणया हे राममां पालय ॥ श्लोकभूल । ३ ॥** रामेणत्यत्र कर्त्तरि तृतीया ।' ३ ॥ इदं धनुः मया रामाय दत्तं भवति रामायदातुं योग्यं भवितुमर्हति । रामायेत्यत्र सम्प्रदाने चतुर्थी ॥ ४ ॥ रमसा सहितं सरमसं वेगेन यथास्यात्तथा मदीया मुक्तिरामात् अभीप्सिता वाञ्छिता भवितुमर्हति । रामादित्यत्र अपादाने पञ्चमी ॥ **श्रीमद्बैजलदेवेन रामभक्तिरतात्मन ॥ ४ ॥ इति चिन्तिततमेकान्ते कदाचित्तिष्ठता सता ॥** बैजलदेवनामाराजा अहं रामस्य दासोत्र सेव्यसेवक भावात्र सम्बन्धात् सम्बन्धे षष्ठी ॥ ६ ॥ रामस्येत्यत्र सार्द्रचित्तवृत्त्या करुणया मे मम: रामे रंजतु निरन्तरं अनुरुक्तो भवति । रञ्जरागे रामे इत्यत्राधिकरणे सप्तमी । ७ ॥ सम्बोधने प्रथमा । हे राम माँ त्वं पालय हे राम इत्यत्र प्रथमा । **एकवचनं सम्बुद्धिः**—सम्बोधने प्रथमाया एकवचनं संज्ञं स्यात् ॥ **एङ्ह्रस्वात्सम्बुद्धेः** ॥ एङन्ताद् ह्रस्वान्ताच्चांगदूहल्लुप्यते हे राम हे रामौ रामाः । "**यस्मात्प्रत्ययविधिस्तदादि प्रत्यये—ङम्** " यः प्रत्ययो यस्मात्क्रियते तदादि शब्दरुपं तस्मिन्नंगं स्यात् । ३ ॥ रामभक्तिरतात्मना

---

१ चौहानानां इति च युक्त पदम् ।

२ भक्तराजोराजा स्वकीयप्रशंसास्पदपदरचनायां प्रायः समर्थः नासीत् । वस्तुतस्तु केनचिद् विदुषा कालान्तरेण परिवर्द्धितः अथ पाठः इति ममाभिप्रायाः ।

श्रीमद् वैजलदेवेन कदाचित् एकान्ते निर्जने स्थाने इति एवं चिन्तितं विचारितं। तिष्ठता सता तेन रिपतिं कुर्वता। ४ ॥ कर्णेन सहितः सदधीचिः कृषिः सः कर्णादिनकरः सुचिरं बहुकालं अवि पृथिव्यां न अतिष्ठत् **अस्तिवज्रभयं यस्य यस्य चर्म च वर्मवत् सदधीचिः सकर्णोवाना तिष्ठत् सुचिरं भवि ॥ ५ ॥**

प्रबोध चन्द्रिका सटीका प्रारभ्यते

अस्थि वज्रमयं यस्य यस्य चर्मवर्मवर .... सुचिरं मुदि अयं श्लोकस्तु परिशिष्टभागे उल्लेखितः।

व्याख्या चेयं प्रदर्श्यते :—

कथं भूतः सदधीचिः यस्य अस्थि वज्रमयं वज्रेण तुल्यं वज्रमयं पुनः कथं भूतः कृषिर्थस्य चर्मवर्मवत् वर्मणातुल्यं वर्मवत् ॥ ५ ॥ "तेषा दधीचि प्रभृतीनां स्वर्ग प्राप्तानां सम्प्रति—इदानीम् शरीराणि राज्यानि धनानि च न सन्ति किन्तु तेषां भूतले भूमौ कीर्तिरेव जागर्ति स्थिरा ॥ ६ ॥" **पद्मनीपत्र जलवत् संसारे सर्वत्र स्थिरं कीर्तिरक्ष रसबद्धा स्थिरा भवति भूतले ॥**

इह संसारे सर्वत्र अस्थिरं भवति। कमिप पद्मनीपत्र जलवत् जलेन तुल्यं जलवत् भूतले भूमौ कीर्ति अक्षरद्वय संबद्धा संयुक्ता कीर्तिस्थिरा भवति। इह लोके इति। येन कर्मणा इह लोके सुखं परलोके च भवेत् तदेव प्रत्यहं दिनं दिनं प्रतिं दूरदर्शिना पुरुषेण कर्मकर्त्तव्यं भवति। यदा कर्त्तरि तृतीयास्यात् कर्मणि प्रथमा तदा। "**संसाराम्भोधीति**" रामनामानु कीर्तनं श्रीरामनामोच्चारणं कृतं चेत् जनैः तर्हि संसारांम्भोधितरणं संसारसमुद्रतरणं सुखेन भवेन्। तस्मात् कारणात् मया वैजलक्षोणी पालेन रामनामान्विता प्रक्रिया क्रियासा कार्या। प्रक्रियन्ते शब्दा-व्युत्पाद्यन्ते अनयासा प्रक्रियासा करणीया कर्तुं योग्या भवति ॥ ९ ॥ बालाना-मिति० कस्मै प्रयोजनाय बालकानां प्रबोधाय अपि इति निश्चयेन विदुषां पंडि-तानां तोषाय सन्तोषाय च पुनः आकल्पं कल्पपर्यन्तं इह संसारे कीर्ति अवस्था-पनाय च स्थिरीकरणाय मया प्रक्रिया मया कार्या ॥ १० ॥ चिन्तयन्निति निर्यातः क्रीडंतं श्रीहिराधरं श्रीमान् वैजल भूपालो विलोक्येत्यब्रवीत्सुतम् ॥ ११ ॥

प्रबोधचन्द्रिका टीका

विद्ययाद्योतते राज्यं विद्ययाजीयते रिपुः । विद्यया जायते कृत्यं विद्यया लभ्यते यशः ॥ १२ ॥ विद्यया जायते धर्मो धर्मेणार्थः प्रजायते । अर्थेन जायते राज्यं सुखंराज्येन जायते ॥ १३ ॥ विद्यापितेव हृतकृदिविद्या मातेव रक्षिका । विद्याप्रियेव सुखदा विद्याकल्पलतोपमा ॥ १४ ॥

टीकाः— विद्ययाराज्यं द्योतते प्रकाशते अत्र विद्याकरणेन पुरुष कर्त्तृणा राज्यकर्मक प्रकाशनानुकूलो व्यापारः । एवं देवदत्तेन रिपुः जीयते जयो भवति, केन साधनेन विद्यादि साधनैः । सामदामदण्डादिभेदैः अत्र रिपु कर्मक देवदत्त कर्त्तृक विद्याकरक जयनानुकूलो व्यापार इति शब्दबोधः । यथा रामेण बाणेन हतो वाली ॥ कर्त्तृकर्णयो स्तृतीयेति० पूजनादि कृत्यं कर्म विद्यया जायते देवदत्तेन यशः लभ्यते कया विद्यया ॥ १२ ॥ " धार्मिकै धर्मोधार्यते कथा धर्मविद्यया यथा धर्मो जायते । " उद्योगिभिरर्थः संपाद्यते यथार्थः धर्मेण प्रजायते तथा सम्पाद्यते नत्वन्यथा । अर्थेन धनेन साधनभूतेन सेनापतिभीराजभीराज्यं जायते प्राप्यते । सेनापतीनां इति वा तृतीयार्थे षष्ठी । राज्येन करणेन सुखं जायते । यथा सुख मनुजायते राज्ञा राज्ञां वा । यथा सुख मनुभूयते स्वामिनाऽत्र कर्माऽभावः । एवमन्यत्रापि बोधव्यम् । अर्ज अर्जने संग्रह करणे अर्ज्यते अनेनेति अर्जन संचय करणम् । यथा कैश्चिद्धर्मीयते । लः कर्मणि चा कर्मकेभ्यः । लकाराः सकर्मकेभ्यः कर्मणि कर्तरिच स्युरकर्मकेभ्यो भावेकर्तरिच ॥ १३ ॥ विद्यापित्रा इव हितकृत हितकारिका विद्यामातेव रक्षैकारक्षणशीला । विद्याप्रिया इव सुखक्ष विद्याकल्पलतोपमा । यथा कैश्चित् याचिता कल्पलता वांछितार्थं ददाति तद् वदियमपि ॥ १४ ॥ सर्वेषां धनानां मध्ये विद्याधनं अनुत्तमं सर्वोत्तमम् । यत् दीयमानं वर्धते अंतरायात् विघ्नात् अन्य जन्मना ... ... दिनप्रपत्ति शिष्येभ्यः विद्वद्भिः पाठ्यमानाया विद्यासाकश्चिदपि " धनानामपि सर्वेषां विद्याधन मनुत्तम ... ... विद्याधनेति० विद्या च धनं च विद्याधने विद्याधनाभ्यां विहीनः रहितः यः स विद्याधन विहीनः अथवा विद्याएवधनः विद्याधनः तेन वि० विशेषेणहीनः विद्याधन विहीनः सः का पुरुषः कुत्सित पुरुषः कुपुरुषः इति श्चिते

पुरुषशब्द परेपरतः कुशब्दस्य विकल्पेन का देशः कुपुरुष कापुरुषः । तस्मात्कारणात् हे पुत्र विद्यार्जने विद्यासंग्रह करणे यत्नं नाम उद्योगं कुरु निरन्तरं नाम अहर्निशं । अहा च निशा च अहर्निशं नकारस्य सकारः । समुदाजस्य एकत्वात् एकवचनं नपुंसकं च । स्त्रीच पुरुषश्च स्त्रीपुरुषौ इमौ । स्त्री च पुमांश्च नपुंसकं च स्त्रीपुंनपुंसकानि स्त्रीपुंनपुंसकं परपदस्यैवात्र लिंगं द्विवचन बहुवचने भवतः इतरेतरावयव प्रधान द्वंद्वे ॥ १७ ॥ यावदिति । ते तव यावत्कालपर्यन्तं राज्यचर्च्चान । यावत्कालपर्यन्तं विषये अग्रहो न यावत् यौवन मदोन । तावत्कालपर्यन्तं विद्यां उपार्जय सम्पादय । त्वं कर्तृक विद्याकर्मक उपार्जनानुकूलो व्यापार इति शाब्दबोधः ॥ यावत्तादित्यव्ययौ । १८ ॥ औदार्यात । अत्र भावेप्रत्ययः । उदारस्याभावः औदार्यं धीरस्यभावः धैर्यं गम्भीरस्यभावः गाम्भीर्यं शूरस्थभावः शौर्यं । यस्येति चाकार लोपः तद्धितप्रत्यये परे परतः पूर्वस्य वृद्धिः । तद्धितेष्व चामादेरयनेन । आपाद परिसमाप्ते भवकर्माधिकारः स एव गुण इति औदार्य धैर्य गाम्भीर्यशौर्यादि गुणः तैः संयुक्तः इति औदार्य० विद्या च विनयं च विद्या विनये विद्या विनयाभ्यां सम्पन्नः युक्त इति विद्याविनय सम्पन्नः एवं भूतश्चेत् सर्वेषां जनानां प्रियः स्यात् । अथ मित्रं सुखासुहृत् इत्यमरः ॥ १९ ॥ दानेन दयया चैव युद्धेन निज कर्मणा । लोके प्राक्तनेन पूर्वार्पार्जितेन कर्मणा कश्चिद्राजा मूर्द्धाभिषिक्तो भवति । कश्चिद्रंको दरिद्रो भवति । मशक मरिंचि विरिंचि मशक समकरणान्ते श्रुतिगीतं । गीयव्याद्य गजगणिका तारकमाभय्यव भवभीतं चेति शिवगिरिणोक्तं तत्रापि कर्म फलप्रदाता चेश्वरः । इह लोके प्राक्तन कर्मणि पूर्वोपार्जित कर्मणा जनः सुखं दुरवं भुंक्ते ॥ इत्यन्वयः ॥ कर्मसाधनक सुरवदा च कर्मपुरुष कर्तृक सुख्दुख भोगानुकूलो व्यापारः ॥ २३ ॥ स्वर्ग च नरकं चापि भुंक्तेति निजकर्मगा ॥ स्वकृत कर्मपाशोऽयं सर्वेषां दुरत्ययः ॥ २४ ॥ अयं कर्मपाशः सर्वेषां जनानां सुदुरत्ययः दुःसाध्यः कथं भूतः स्वकृतः स्वेन कृतः ॥ अथ च जनः निज कर्मणा जन्मान्तरार्जित कर्मणा स्वर्गं नरकं भुक्ते । इत्यन्वयः । " भुजपालनाभ्यवहारयोः " तस्माद् वर्तमाने लट् । देवदत्त कर्तृक निजकर्मकरणक स्वर्गनरक भोगानुकूलो व्यापारः । कर्मणापाशः कर्मपाशः सर्वकर्तृक स्वकृत पाश कर्मक दुःसाध्यानुकूलो व्यापारः ॥ २४ ॥ एवं वदन्तं पितरं कथ वाक्यप्रबन्धे वद

वक्तायां वाचिं । वदन्तमितिशतृ प्रत्ययान्तं विनीतः नम्रीभूतः श्रीहिराधरः कृताञ्जलि पुटो भूत्वा नाम बद्धाञ्जलि पुटो भूत्वा सव्रीडः लज्जयासहितः । अस्मादिति इवः इतो नाम पितृ सिक्षणोपादानात् तं पितरं वक्ष्यमाणं वाक्यम् अब्रवीत् कथयामास । ब्रूञ् श्यक्तायां वाचि इत्यन्वयः नमनापूर्वक सुत्रकर्तृक पिताकर्मक लज्जा करणक भाषणानुकूलो व्यापार इति शब्दबोधः । अत्र कर्त्तरि प्रत्ययः ॥ यथा द्विजः गुरु मब्रवीत् विनीतः सन् ॥ २५ ॥

मातापितृभ्यां विरसं ... ... ॥ २६ ॥

अत्र मातापितृभ्यां कर्तृकाभ्यां सुतः पुत्रेण विरसादि वाग्भेषजं प्राप्यते वागौषधं राजभिर्धनिनः क्रर वाक्यं वागुत्तमं च नीयते ॥ ३ ॥ पुत्रबोधाय वाक् भेषजं रस-रहितं तत्परिणाम रसावहं परिणामे सुख प्रापकं ॥ तिक्तं तीक्ष्णं कटु कषायं अति कटु अम्लकं वाग्भेषजं पुत्रोदितः परिणाम सुखं सुतो याप्यते ॥ अत्र याप्यते इत्यत्र सुतरुपे कर्मणि यक् प्रन्ययः भः कर्मणि इत्यनेन ॥ मातापितृभ्यामित्यत्र । कर्तृकरणे योस्तृतीया ॥ अनभिहिते कर्त्तरि करणे च तृतीया ॥ मातृइत्यत्राकारः अत्र रस-मनुक्तं कर्म यथा अजाग्रामं नीयते नागरिकैः लिंगसंख्या विदेपि उपमानोपमेयता । विभक्ति पुनरेकैव उपमानो पमेव योरिति ॥ लिंगभेदेपि तावत् "मातंग इव कामिनी विहरन्ति" । संख्या भेदेऽपि तावत् स इव मधुरमभी गायन्ति लिंगसंख्योर्भेदेऽपि तावत् स्वामी इव प्रकृतयः सेव्याः अपि शब्दात् भेदेऽपि तावत तरंग इव हस्ती धावति ॥ सुतकर्मक मातृपितृ कर्तृक विरसादि । विशेषण वाक् विशेष्यक सुख-प्राप्त्यनुकूलो व्यापारः । २६ ॥

श्रवणाञ्जलिनी पीत ... ... आज्ञाप्यता मितिमह्यं तव कृतम् उपदेशामृतं मया श्रवणाञ्जलिना पीतं पानकृतं हे देव इदानीं सांप्रतं मह्यं श्रीमद्भिरदीयतां किं न किमपि सर्वदीयताम् स्यात्तथापि तन्मध्ये यत् प्रेष्ट तमं दीयतां दातुं योग्त्रं तदीयतम् मद्यमिति । हे देव मया कर्तृक उपदेशामृत कर्मक कर्णाञ्जलिना अज्ञापनानुकूलो व्यापारः । आङ्पूर्वकज्ञा अवबोधने धातुः तस्मात् यक् आदन्तात् युक् आज्ञप्यतां लोट रूपं मयः किं करणीयं श्रीहिराधर पुत्रेण मया ॥ ॥ २६ ॥ श्रीमान् वैजल .... पुनः ॥ २८ ॥ पितृवाक्यानि

बोद्धव्यं यदुक्तं बालकं प्रति ॥ नान्यत्र दर्शयिष्यामि श्लोकानामनुसारतः ॥ २९ ॥ श्रीमान् वैजलः पुनः सुप्रीत्या साधन मूलयापरि तुष्टात्मा प्रसन्न मनसाः हिएर्धी बाललं सुतं वक्ष्यमाणं वाक्यं इतिमाम् अमुना प्रकरेण अवदत् कथितवान् इत्यन्वयः ॥ भूपालकर्तृक प्रेमविशेषणक प्रीतिकरणक सुतकर्मक कथानुकूलो व्यापारः श्रीविद्यते यस्य स श्रीमान् श्रीमान् वैजलश्च भूपालश्च श्रीमान् वैजल जूपाल ॥ २९ ॥ नीति-विद्या .... यथा नीतिः० राज्ञः द्वेविधे सदा विहितं विधान कृतं के द्वेविधे तत्राह एका नीति विद्या एका अस्त्र विद्या मंत्र विद्या तयोर्द्वयोः मध्ये अपि विनिश्चयेन राज्ञां नीतिविद्या अधिकाधिक वरानीति विद्यया राजभिः राज्यं ध्रियते धारयन्ति ॥ इत्यन्वयः ॥ विद्यासंविध मात्रे राज्ञः षष्ठी त्युदाहृतः सा विद्या साध्यायां प्राप्ता राज्य रक्षणे कर्मणि राजकर्तृक विद्याकर्मक विद्याकरणक राज्यधारणा-नुकूलो व्यापारः । ध्रियते इत्यत्र राज्यमित्यस्मिन् कर्मणि यक् प्रत्यय लट्च । यदा-गमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ संधिना विग्रहो यानमासनं द्वेधमाश्रयः ॥ षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साह मंत्रजा क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवे-दिनामित्यमीः ॥ क्रियाकारक विज्ञानान्नीति ....

अस्मानि युष्मद्भिर्वा क्रियाकारक विज्ञानात् परिचयात् नीतिविद्या सम्यक् प्रकारेण विविच्यते विवेचनानुकूलास्यात् च पुनः स्यादित्या परिज्ञानात् अवबोधनात् शाब्दीवुद्धिर्विवर्द्धते शब्देनवाशाब्दी शब्दनिष्णाता वुद्धिवर्द्धिता स्यात् ।

क्रिया च कारकं च क्रियाकारके तयोर्विज्ञानं क्रियाकारक विज्ञाटं तस्मात् क्रियाकारक विज्ञानात् विविच्यते इत्यत्र नीतिरूपे कर्मणि यक् प्रत्यपः ॥ शाब्दीति बुद्धिरुपे कर्मणि लट् लकारः । क्रियाकारकोपापादान युष्मद्भिः कर्तृक नीतिकर्मक विवेचनानुकूलो व्यापारः । स्यादित्यादि परिज्ञानोपपादानक युष्मद्भिः कर्तृक शाब्दी-बुद्धि कर्मक विवर्द्धनानुकूलो व्यापारः ॥ ३० ॥

विनाव्याकरणवाणी .... ॥ ३१ ॥

विनेति विदुषां सदसि व्याकरणं विना वाणी सुखाय कदापि ना एवं रमणी पुनरीरणे रमणं रमणकर्तृकं पुरुषं विना सुखायन सुखानुकूलानस्यादिति एवं विवेकं

विना धनिना पुरुषेण लक्ष्मी अन्यथा चारिताचेत् व्ययीकृता चेत् भोजनदानादृते सत्पात्रेभ्यः परमेश्वरप्रीत्या जदताचेते सा सुखाय कदाचन कदापि न सुखसाध्या न स्यात् इत्यन्वयः । विना योगेऽन द्वितीया ॥ सुन्दरीरमणी रामा इत्यमरः ॥ यत्र क्रियया यं प्रापणं तत्र चतुर्थी । यथा पत्येशेतेपत्नी । राज्ञे करंददाति । केनचित् व्याकरणे विनावाणी गदिता चेत् तस्मै सुखाय न । देवदत्तकर्तृक व्याकरण अनुक्तकर्मक विना योगिक वाणी उक्तकर्मक असुरवानु कूतो व्यापारः । व्याक्रीयन्ते शब्दा व्युत्पाद्यन्तेऽनेनेतिव्याकरणं कृदन्तप्रत्ययेल्युट् तस्य अन व्याकरणं ॥ ३१ ॥

तस्माद् व्याकरणं पूर्वं ... . यथापुरवं ॥ ३२ ॥

तस्मादिति ॥ तस्मात् कारणात् हेपुत्र त्वं बुद्धिवृद्ध्ये पूर्वंप्रथमतः व्याकरणे पठ ॥ पश्चात्तत्वं नीतिं पठित्वा यथापुरवं । सुरवमन विक्रम्य यथासुखं राज्यं भज सेवस्व । भजसेवायां । बुद्धेर्वृद्धि वुद्धिवृद्धिस्तस्मै बुद्धिवृद्ध्ये । धेर्डिति इति एकारे एचोऽयवायावेति अय् बुद्धिवृद्ध्ये बुद्धिवर्द्धनाय । पठ व्यक्तायां वाचि । त्वत्कर्तृकतदुपादानक व्याकरणमनुक्तकर्मकषष्ठी पठनकर्मक बुद्धिवर्द्धनानुकूल व्यापारः । पश्चादिति तदुत्तरंनीति प० त्वं उक्तकर्तृकराज्यमनुक्तकर्मक यथासुखं राज्यमितिभजनानुकूलो व्यापारः । त्वमितिकर्त्तरि लोट भजेति मध्यमपुरुषैकवचनं ॥ यस्मिन्नर्थे विधीयन्ते त्यादि तव्यादि तद्धिताः ॥ समाप्तो वा भवे द्यत्र स उक्तेः प्रथमाततरिति कारिकाः ॥ अंकुरोभवति अवगाहतेसरसीं कुंवर । अवगाह्यते सरसी कुंजरेण वा । तव्यादिर्यथा वसेस्तव्यः कर्त्तरिणिच्च ॥ वास्तव्यो देवदत्तः अनुक्तः कर्त्ता यथा ॥ कर्त्तव्यः कटो भवता तद्धितप्रत्ययो यथा वैयाकरण-देवदत्तः ॥ शतिकः पटः । समाप्तोयथा ॥ आरूढ़ः पुरुषः करोति ॥ पुरुषौ कुरुतः पुरुषा कुर्वन्ति । कारकः पुमानं । कारिका स्त्री । कारकं कुलं । वैयाकरणः पुरुषः वैयाकरणीभार्या वैयाकरणं कुलं । आरुढ़ वानरोवृक्षः । आरुढ़ वानराशाखा । आरुढ़वानरवृक्षाग्रणीति ॥ ३२ ॥

शक्तिराज्यांगसेना .... रक्षति ... ३३

शक्तीति:— राजा एतान् शक्त्यादीन् यथाकालं प्रयुञ्जानः सन् राज्यं रक्षति । शक्तिश्च राज्यांगं च सेनागं च त्रिवर्गः च उपायं च षड्गुणानि च

इति शक्तिराज्यांग सेनांनात्रिवर्गोपाय षडगुणतान् शक्तिराज्यांग सेनांगत्रिवर्गोपाय षड्गुणान् समाहार द्वंद्व । विभक्तीनां लुक् समास सूत्रेण कालमनतिक्रम्य यथा कालं समासो अव्ययीभावः प्रयुंजानः प्रकुर्वाणाः राजनि कर्तरि रक्षधातोर्भट् शानच् प्रत्ययश्च छट्वत् राज्यमनुक्तं कर्मशतृशानचौ चेतिपूते वदिति सरस्वती वचनात् । युजिर् योगे प्रकृष्टेन युंजतेऽसौ प्रयुंजान. । शक्तयस्तिस्रः प्रभावोत्साह मन्त्रजाः स्वाम्यमात्यसुहृत्कोशराष्ट्र दुर्गबलानि च राज्यांगानि प्रकृतयः पौराणां श्रेणयोऽपि चेति राज्यांगानि ॥ हस्त्यश्वरथ पादातं सेनांगं स्याच्चतुष्टयम् इति सेनागं । क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीति वेदिनामिति । भेदोदण्डः सामदानमित्युपाय चतुष्टयं ॥ संधिर्नो विग्रहो यानमासनं द्वैधमाश्रयेति षड्गुणा इत्यमर ॥ राजृदीप्तौ । राजते प्रकाशते स्वकीयेन तेजसेति राजा शतृप्रत्ययः । " उगिदचां सर्वनामस्थाने " इति नुम् । सर्वनामस्थाने चासम्बुद्धाविति दीर्घः ॥ " न लोपः प्रातिपदिकान्तस्येति न लोपः । राजा राज्ञः कर्मभावो वा राज्यं यणोऽप्रत्ययः ॥ राजा उक्त कर्तृकराज्य मनुक्त कर्मकं प्रयुङ्क्षानेति कर्तृरिचानस प्रत्ययक यथा कालं शक्त्यादीन नुक्तकर्मदीन् प्रेरणानुकूल व्यापारक रक्षणानुकूलो व्यापारः । शक्त्यादीत्वाच्च युद्धादौ सूरकर्मणि ॥ शौर्यकर्म समायुक्ते राजाराष्ट्रंहि रक्षति ॥ १ ॥ श्रीगणेशो यथा स्वकीय पार्षदान् विघ्ननिवारणेयो जयित्वा भक्तान् रक्षति ॥ ३३ ॥

क्रियाकारक संबन्धा ... ... पद्यताम् ॥ ३४ ॥

क्रियेति सा इयं उत्कृष्टा प्रक्रिया सम्प्रति इदानीं त्वया पठ्यताम् ॥ पठव्यक्तायां वाचि । लोट् रूप कुतः पठ्यतामिति ॥ यथा प्रक्रियया पठितया कृत्वा क्रियाकारकादीनां ज्ञानं स्यात् । तस्मात् क्रियाकारक सम्बन्धात् आपादानात् शास्त्रविषयं ज्ञानं चोत्पद्यते उत्पन्नं स्यात् इत्यन्वयः । यथा अनभिहित कर्तृक क्रियाकारक संबन्धापादानक ज्ञानमुक्तकर्मक उत्पन्नानुकूलो व्यापारः । त्वया अनुक्त कर्तृक इदम् शब्दबोधित पठ विशेषणोभूतक प्रक्रिया उक्त कर्मक पठनानुकूलो व्यापारः यथा श्रीमच्छिवेन पाठिता प्रक्रिया पार्वत्यसा श्रीमत् पार्वत्या बोधजीया ॥ देवदत्तेन यज्ञदत्ताय वा देवौ हरिहरौ वंद्यौ भक्तैस्तदनुरागिभिः । सुखसाध्यौ

भवेतां द्वौ पूर्व कर्मानुसारेतेति शाब्दिकाः खफद्दठेति पठेयुः तार्किकाः घटपटेति रटेयुः मादृशैस्तु सततं स्मरणीयौ चन्द्रचूड चरणौ रमणीये। क्रिया च कारकं च क्रियाकारके क्रियाकारकयोः सम्बन्धः क्रियाकारकसम्बन्धः तस्मात् क्रियाकारक सम्बन्धात्॥ ३४॥

प्रबोधचन्द्रिका नाम .... हारिणी॥ ३५॥

प्रकृष्टेन बोधः प्रबोध यथा। प्रबोधकारिकाया चन्द्रिका इति प्रबोध चन्द्रिका तदेव नामधेयं यस्यास्तत्प्रबोधोचन्द्रिकानामा चदि आह्लादने दीप्तौ च॥ रक्प्रत्ययः। चंदतीति चन्द्रः चन्द्रवदियं छात्राणी हृदयप्रकाशिका इति चन्द्रिका चन्द्रएव चन्द्रिका साधर्म्यात् इयमपि। यथा चन्द्र एव चन्द्रिका पट-पटादि वस्तूनि प्रकाशते तद्वत् चन्द्रिका कौमुदी ज्योत्स्नायेकाः॥ रामचन्द्रेण समाश्रिता रामचन्द्रसमाश्रिता रामचन्द्र नामांकिता इत्यर्थः कथंभूता प्रबोधचन्द्रिका अज्ञानतिमिरध्वंस कारिणीनि अज्ञानमेव तिमिरं अज्ञानतिमिरं अन्धकारं तं ध्वंसय-तिनाशयति नाशं कारयति गुरुपठनद्वारा छात्राणामित्यज्ञान तिमिरध्वंस कारिणी। कथं भूता सा चित्तहारिणी मनोहारिणी चित्तंहरतीति चित्तहारिणी भगन्नामोच्चार-णेन॥ डुकृञ् करणे। हृञ् हरणे। अत्र राजकर्तृक विशेषणैर्विशेषिता प्रबोध-चन्द्रिकाकर्मक ज्ञानोत्पन्नानुकूलो व्यापारः॥ अत्र कर्मणि प्रत्ययः। सा त्वया पठ्यतां या मया कृता। चित्तं हरतीति चित्तहारी अण् कर्मणि कृत्प्रत्ययः कर्म अस्यास्तीति कारिन् स्त्रीचेत् कारिणी "कृन्नेभ्योङीप्"॥ कृद्भ्योनान्तेभ्यश्चङीप् यथा कर्त्री दण्डिनी उदाहरण। ब्रह्मणा प्रेरिता देवी हंसारूढा सरस्वती कंठा-भरणं देवी त्वया सम्प्रति पठ्यताम् इति॥ ३५॥

वहवः॥ प्रक्रिया ग्रंथाः ... ... कालनान्तरे॥ ३६॥

वहवः॥ हे पुत्र प्रक्रिया ग्रन्था वहवः प्रक्रिया ग्रन्था क्षतिचेत् सन्तु का क्षतिः अस्माकं क्षतिः का अस्मदीया क्षति का? न काचित् एवं चेत् तर्हि किं जातं॥ तत्रोच्यते मया। प्रबोध चन्द्रिकायां यन्माधूर्यं मधुरसं यद् वर्तते तदन्यत्र नास्ति केषां कस्मिन्निव। यथा मधुपानां भ्रमराणां लतान्तरे मालतीमधु

कापिन । मालतीमधुमालत्या मेवनान्यत्र लतानामन्तरः लतान्तर तस्मिन् लतान्तरे ॥ त्वया कर्तृक प्रक्रिया कर्मक पठनानुकूलो व्यापारः । स्पष्टमन्यत् ॥ ३६ ॥

विभक्तितानतो .... चाप्यते ॥ ३७ ॥

विमक्तीति मया पुत्राय प्रवोधाम विमक्तिः पाठ्यते ॥ मया कर्तृक प्रवोध-कर्मक प्रयमका लापादानन्न पाठनान कूलोव्यापारः । विमक्त्यादिसाधनैः कृत्वा मयापुत्रः पाठ्यते पठन व्यापारे मया योज्यते । विभक्तिज्ञानसाध्यः... .... पाठ्यते मया ॥ ३७ ॥ श्रीमद वा गाद्यधीशाय .... दक्षिणामूर्तयनमः ॥ स्यादि .... सप्रश्न ॥ ३८ ॥ पाठ्यते इत्यत्र सावधातुके यक् । धातो-र्यक् । प्रत्ययः स्यात् भावकर्म वाचिनी सार्वधाजकेपरे पाठ्यते भालवकः देवदत्तेन स्यादिति० सि आदिर्यस्यस्मुदायस्यासौस्यादिः ति० आदिर्यस्य विभक्ति समूह-स्यासौत्यादिः स्यादिश्च स्यादिश्चस्यादि त्यादीतेद्वे भक्तीचे तिस्यादिस्त्यादि विभक्ती भवतः इतरेतरद्वंद्वः तत्रस्यादौ सप्तविभक्त यः सन्ति तास विभक्ति सप्तस एक वचनद्विवच बहुवचन संज्ञकानि वचनानिस्युः यथा क्रमेणा मया कर्तक पुत्र उक्त कर्मक सप्रविभक्ति अधिकरणक एकवचनादिअरल कर्मकस्यादि विभक्ति पाठनान लोव्यापारः सकश्च द्विश्चबहुश्च एकद्विबहवः संज्ञाः येषां वचनानां ते एक द्वि बहुसंज्ञाः तानि एकद्वि बहुसंज्ञानि एवं भूतानिवचना निसप्तस विभक्तिष सन्ति " जालावेकवचने स्यादित्यत्र सिसौ जस् (१) अम् सौ शस् (२) टाभ्याम् भिस् (३) ङे. भ्याम् भ्यम् (४) ङ० ङिभ्याम् भ्यस (५) ङस् ओस् आम् (६) ङि ओस् सुप् (७) सरस्वती प्रणीता विभक्तयः ॥ पाणिनीये० स्वौजस मौटशस टाभ्याम् भिस् ङेभ्याम् भ्यस् ङसिभ्याम् भ्यस् ङसोसाम् ङ्योरसप् ॥ ३८ ॥ प्रथमा .... क्रमात् ताः विभक्ताः प्रथमाद्यावोध्याः स्पष्टमिति । ३९ ॥ क्रमात् उक्ते कर्त्तरिप्रथमा यदा कर्त्तरिप्रथमास्यात् कर्मणिद्वितीया तदा यदा कर्त्तरि तृतीयास्यात् कर्मणिप्रथमा अर्थवदधातुरप्रत्ययः प्रातिपदिक ॥ धातुं प्रत्ययं प्रत्य-यान्तं च वर्जयित्वार्थवच्छब्दस्वरुपं प्रातिपदिकंसंज्ञंस्यात् । कृत्तद्धित समासाश्च ॥ कृत्तद्धितान्तौ समासाश्च प्रातिपदिक संज्ञास्यात् ऽव्यापूप्रातिपदिकात् ॥ ऽव्यन्ता-दावन्नाच्चप्रातिपदिकाच्चपरे स्यादपः प्रत्ययाः स्युः ॥ एकवचन द्विवचन वहवचन संज्ञकाः स्युः । प्रथमैव विमक्तिः स्यादके ... . विभ. ४०

प्रथमैवेति:— राजोवाच— राजोवाच— हे पुत्र उक्तेकर्त्तरि वैउक्तेकर्मणि च प्रथमैव विभक्ति: स्यात् । अथ च अनुक्ते कर्यणि द्वितीया अनुक्ते कर्त्तरि तृयीया यथा हरि भञ्जतिदेवदत्त: । शिवो ब्रंह्म: भक्तै: । अनुक्ते कर्त्तरि उदाहरणं विष्णुनाहतादैत्या: शिवेन त्रिपुरोहव: ॥ मातरंस्मरतिपुत्र: ॥ उक्तानुककर्त्ता कर्माधिकरणकप्रमा द्वितीया तृतीया विभक्ति कर्मकमवनानुकूल्पो व्यापार: ४० ॥ तत्रोक्तेकर्त्तरि .... जपन्ति ४१ ॥

वत्रेति० जी जये । रामइत्यत्र उक्तेकर्त्तरि उदाहरणमाह ॥ तत्र अस्मिलोके शम: यथास्यात्तथारणे युद्धेवैरिणो जपन्ति रामौ द्वौ युद्धे वैरिणौ जपत: । रामास्त्र योरणे जयंतीति अन्वय वैरिण इत्यत्र शसोरूपं ॥ रामास्त्र यकर्तृकवैरि कर्मक उक्ताधिकरणक जयानूकूले व्यापार: ॥ राम: रामौरामा .... रामेषु । अद्वितीयशिवा: पातु भेदपापाच्चसर्वथा । शिवौपातां शिवा: पान्तु कामक्रोधादिवैरिण: ॥ ४१ ॥ सम्बोधनेप्रथमा .... ४२ सम्बोधनेपीति० अपीति निश्चये न ध्रुवं निश्चयेन यथास्यात्तथा येन प्रकारेण सम्बोधने आह्वानेन सन्तु सन्मुखीकरणे वाच्ये प्रथमैव विभक्ति: स्यादित्यन्वय: । यथा हे गोरिहे गौर्य्यौ हे गौर्य: इत्युक्तमात् । सैवात्मा त्वां वक्षे येनात्माते प्रसीदति ॥ वैजलदेवकर्तृक हिराथर मनुक्तकर्मक प्रथमा विभक्ति उक्ते कर्मकहेरामादिक सम्बोधनाधिकरणक प्रथमाविभक्तिर्मवनानु कूलो व्यापार: ॥ मा समुद्धरगोविन्दप्रसीदपलेक्ष्त्रा ॥ कुमारोऽसौ स्माथा ज्ञमध्वं भोतपस्विन् इति वदिति अनुर्मूति स्वरूपाचार्येण भगवता चोक्तम् ॥ ४२ ॥

हे शब्देन विनापि .... भजाम्यहं ४३ ॥

हे शब्देनेति:—सम्बोधनं क्वचित् कुत्रचित् हे शब्देन विना अपि स्यात् । कुत्रचित् हे शब्द: अग्नेऽपि भवेत् । यथा नाम येन प्रकारेण राम नाम हे राम येनोपायेन त्वं प्रसन्नो भवसि तथा त्वामहं भजामि । रामहे नाथ हेराम त्वं प्रसीद प्रसन्नोभव प्रसीद इति लोट् रूपम् सिप्रत्ययेपात: प्रपूर्वकसीदादेश: दृशादीनां पश्यादय: । षद्लृविशरणेगत्यवसादनेषु । अत्राद्र भावोग्राह्य: हेरामेति " एक वचनं सम्बुद्धि: एड्हस्वात् सम्बद्धिरिति द्वाभ्यासिद्धम् । हे शब्देनात्र विना योगात्तथा आदिशब्दात् द्वितीयाया विभक्तयस्तैरपि प्रयोगे श्रीमद्रामाश्रम प्रक्रियाया आद्यन्ताधिकरणक हे शब्दाकरणकपौरणाक सम्बोधन विषयक हे शब्द भवनान

भूलो व्यापारः अहं कर्त्तृक यथा व्ययं प्रसीदक्रियाम्पां बोधितसम्बोधन विषयके हे राम त्वाभतिराम कर्मक भजनानकूलो व्यापारः । स्वयमेव भजति । संमति क्षमस्व मम दौराढ्यं हे कृष्णयदुनन्दन । सर्वज्ञ सर्वकिचक्षणान्त कृष्ण हे त्वां भजाम्यहमिति ॥ ४३ ॥

इत्युदाहरणं .... दीयते ॥ ४४ ॥

इत्युदाहरणमिति० उक्ते कर्त्तरिकेवले यथास्यात्तथाभयावैजल देवेन उदाहरणं ल्युडिति रूपं कृत्प्रत्ययः । उत्पूर्वकं आङ् पूर्वकं हृहरणे हरणमिति उक्त कर्म गुणाः दत्तमित्यत्र निष्ठाप्रत्ययः दद दाने धातोः "खरि चेति" तः । अथेत्यनन्तरं । त्वंताथादि न पूर्वभाक् इत्यमरः त्यम किञ्चित् स्वरूपमपि । उक्ते कर्मणि मया उदाहरण दीयते अथापि उदाहरणं ल्युडन्त मुक्तं कर्म तत्र लट् सार्वधातुके यक् कर्मणि यक् सार्वधातुकेपरतः ददानिधातोः आकारस्येकार मयाकर्त्तृकं उदाहरणकर्मक उक्ताधिहरणक इति केवलं वाक्यालंकारे दानानकूलो व्यापारः । राजकर्त्तृक उदाहरण कर्मक उक्ताधकरणक अथेत्यनन्तरार्थक किञ्चिदिति स्वरूपार्थक उदाहरणानुकुलो व्यापारः इदृशैः शाब्दबोधैश्च पाठ्यः पुत्रोऽनरागतः ॥

न जीयतेन जीयते .... निश्चित ॥ ४५ ॥

न जीयतेति रणाङ्गणे राम न जीयते शत्रुभिः रामौद्धौ रणाङ्गणे शत्रुभिः वैरिभिर्न जीयेते । रामास्त्रयः परशुराम दाशरथिराम बलिरामेति त्रयोरामा रणाङ्गणे युद्धागणे शत्रुभिर्न जीयन्ते पराजयतां न प्राप्नुवन्ति इत्यन्वयः ॥ जीजये । तस्मात् लट् तस्य तिवादयादेशः । रामरूपे ऊक्ते कर्मणि सार्वसातुके इतिथक् दीर्घश्चे कारस्य । रणइव आंगनं रणाङ्गणः तस्मिन् रणाङ्गणे । गृहाद्वहिर्भूमौ । निश्चित रामोक्त कर्मक अनुक्तकर्त्तृकरणाङ्गणाधिकरणक निश्चितशब्द बोधित शत्रुकृत अजयनानुकूलो व्यापारां रामाश्रयो बोध्यः ॥

दाष्टीन्तेन द्रढयति । हरिहरौ देवो .... निजालेपे ॥ ४५ ॥

प्रथमा .... बुध्यताम् ॥ ४६ ॥

संख्याभिः त्यादिभिश्च प्रथमान्तस्य कर्तृरूपं उक्ते कर्तरि उक्ते कर्मणि च भवेत् अनुक्तस्य कर्तुः अनुक्त कर्मणश्चोदाहरणं प्रथमान्तीय स्वरूपं न प्रथमा

विभक्ति विशिष्टं रूपं न स्यात् कर्तुः कर्मणः। अनुक्ते कर्मणि द्वितीया अनुक्ते कर्तरि तृतीया। उक्ते कर्त्तरि उक्ते कर्मणि प्रथमा चेति सिद्धान्तः। इति अमुना प्रकारेण भवद्भिः बुध्यताम् ज्ञायताम् मया अनुगम्यते पण्डितै सह बहुधा विचार्य ते। अनुपूर्वक गमलृगतावित्यस्य धातोः रूपं उदाहरणरूपे कर्मणि सार्वधातुके यक्। प्रथमान्तस्य कर्तृकर्मण उक्ते कर्तरि कर्मणि उदाहरणं अनुक्तस्य प्रथमान्तस्य कर्तुकर्मण उदाहरणं कदापि न कस्मिन्नपि कालेन॥ प्रथमा अन्ते यस्या सौ प्रथमानतस्य॥ बुध अवगमने ज्ञाने। अत्रापि यक् कर्मणि प्रथमा विभक्ति विशेषणक षष्ठी बोधित कर्ता कर्म विशेष्यक अस्मद् शब्दाभ्यामनुगमन बोधानुकूलो व्यापारः इति शाब्दबोधः। प्रयमेके वचनै नित्य .... अहर्निशं ॥४७॥

अनुक्ते कर्मणीति० अनुक्ते कर्मणि द्वितीया भवेदिति व्याकरणे राद्धान्तः। सा द्वितीया दृश्यते कुत्र अहर्निशं निरन्तरं रामं भजामि रामौ भजावः रामान् भजामः। अहं इत्यत्र। अहमपि उदाहरणे तां दर्शय उक्ते कर्तरि अस्मदि भज् धातोर्लट् भजामीति। कृषि अनुक्त कर्तरि। तृतीया णक्तकर्मक अनुक्तकर्माधिकरणक भाव कर्माश्रय द्वितीया विभक्तिदर्शनानुकूलो व्यापारः। विद्वद्भिर्दर्शनीयाश्च द्वितीयानुक्तकर्मणि। भावकर्माश्रयाज्ञेया द्वितीयासापि दर्शिते। दर्शितेत्यत्र लट् ज्ञेयः। द्वितीयाचोक्त कर्मणि। द्वितीया साह्यनुक्तेऽपि राममित्यादि कर्मणि दर्शनीयेति सम्बन्धः॥ ४७॥

अनुक्ते कर्तरि .... जीयते रिपुः॥ ४८॥

अनुक्ते कर्तरि तृतीया भवेत्। अथ च करणेऽपि तृतीया भवेत्। कर्तरि उदाहरणमाह। यथा रामेण पुः जीयते जयो भवति। रामाभ्यां रिपू जीयेते रामैर्बडभिः रिपवः जीयते पराः प्रतां प्राप्नुवन्ति इत्युक्त अत्र रिपुरूपे कर्मणि उक्ते कर्मणि जीजये धातोः सार्वः तुके इतियक् अनुक्ते कर्तरि अधिकरणक राम अनुक्त कर्तृक रिपु उक्त कर्मक पराजय विषयक तृतीया विभक्ति भवनानुकूलो व्यापारः। अत्र तृतीयान्तेन राम कर्तृक प्रथमान्त रिपु उक्त कर्मणः पराजयानुकूलो व्यापारः। अत्रा नभिहिते कर्तरि तृतीया कारके॥ उदाहरणं दार्ष्टान्तेन दृढयति॥ यथा श्रीशंकराचार्यैः स शिष्येरात्मदर्शिभिः जीयन्ते रिपवः सर्ववादिनो भेदवादिनः।

यथा पञ्चारव्यहस्ताभ्यां जीयेते वादिनौ रणे ।। तथा गिरिसुरेशजीयन्ते हीनकाः ॥ ४८ ॥

करणे दीयते .... निशितैशरै ॥ ४९ ॥

करणेऽ .... :—मया वैजलदेवेन किञ्चित् उत्तमं उदाहरणं करणे दीयते । तदाह:— रामः शत्रूणां शिरांसि निकृन्तन्तिकैः साधनौ कृत्वा शतैः शतसंख्याकैः शरैस्तीक्ष्ण बाणैः कृत्वा । दादाने दीयते इत्यत्र सार्वधातुके यक् उदहरणमित्यत्र उक्ते कर्मणिमयेति अनुक्तकर्त्ता । आकार इकारदीर्घश्च । हुकृञ् करणे ल्युड् युवौरनाकौ इत्यनेन अन् । ह्यहरणे स्वं रामः घञन्तः रमु क्रीडायां । रमति रमयति वा सर्वप्राणिनां शिरांसि मस्तकर्तनशत्रूणां वैरिणो निपूर्वक कृति छेदने नुम शप्लट् निकृन्तति । सकारान्तः नपुंसकः शिरस् शब्दः करणाधिकरण-कमयाअनुक्तकर्तृक उदाहरण उक्तकर्मक किञ्चिदवोधित उत्तम उदाहरण दानानु-कूलो व्यापारः । राम कर्तृक शिरांसि अनुक्त कर्मक शतसंख्या बोर्बधतशरैः करणक शत्रु शिरांसि निकृत्तनानुकूलेव्यापारः करणे क्रीयतेकिञ्चित् उदाहरणमुत्तमं ॥ व्याप्तो ज्ञानानि भिक्षूणी वर्द्धते ब्रह्मपुत्रकैः ॥ ४९ अनुक्ते सम्प्रदाने .... उत्तमं ५० ॥

अनुक्ते इति० याचतुर्थी कारके प्रकरणे संप्रदाने गदिता सा चतुर्थीमया अनुक्तेसम्प्रदाने निगद्यते कथ्यते । तादर्थ्ये चतुर्थीवाच्या यथामुक्तयेहरिं भजति-देवदत्तः । रामाय उत्तमं फलं मया दत्तमारामाभ्यां उत्तमेफले अस्मभ्यमादत्ते । रामभ्यो उत्तमानिफलानिअस्मदभिदत्तोनि चतुर्थी सम्प्रदाने विप्रापगांदहाति । आस्मतीत्वामै अनेन चतुर्थीनि ५०

अनुक्तेस्यापादाने .... रीप्सता । ५१ ॥

ध्रुवमपायेऽपादानं । अपायोविश्लेषः तत्रपंचमी । अपादाने पंचमी यथा ग्रामा-दायाति धावतोऽश्वात्पति । अनुक्ति । अनुक्ते अपादाने पंचमी स्यात् । यापंचमी कारकेप्रकरणे केवलापादाने जायते सापंचमी मया अनुक्ते अपादाने अभिधीयते कथ्यते अत्र यक् प्रत्यये पंचमीरूपे कर्मणि मया कर्तृक पंचमी उक्तकर्मक अनुक्ता-पादानाधिकरणकपंचमी कथनानुकूलो व्यापार उदाहरणमाह ॥ रामात्मया मुक्तिर्ईसि

तावच्छिता अस्मदनुक्तकर्तृक मुक्ति उक्तकर्मक रामापादानकमुक्तिर्वाञ्छनानुकूलो व्यापारः इतिशाब्दबोधः ॥ यथा शर्वाच्च शर्वाभ्यां शर्वेभ्यो ज्ञानमीप्सितं । काश्यामृत्वकजन्तूनां सर्वेषां ज्ञानदोहरः ॥ मणिकर्णिह्रमीपेच तारकश्चन्द्रशेखरः २ ॥ तत्तीरेमणिकर्णिकेति श्रीशंकरवचनात् हरिहरौ सायुज्य मुक्तिप्रदा

अनुक्तेस्यात्तु सम्बन्धे .... कीर्ति लत्तमा ॥ ५२ ॥

श्रीगोपाले हरौ भक्तिः कर्त्तव्या नूतनामया कृष्णस्य कृष्णयोश्चपि कृष्णानां कीर्तिरुत्तमा ॥ १ ॥

अनुक्तेति०:— अनुक्ते सम्बन्धे तु षष्ठीस्यात् तस्याः षष्ठया उदाहरणं । श्लोकस्य उत्तरार्द्धे मयादीयते उत्पूर्वकहृधातो कृदन्तक्तिः प्रत्यय उदाहृतः कित्वाद् गुणाभाव यथा रामस्यकीर्त्तिरुत्तमा रामयोर्द्वयोः कीर्ति उत्तमेरामाणी सर्वेषां कीर्तय उत्तमा अस्माभिर्दृष्टा इत्यन्वयः । स्यादनुक्ते तु सम्बन्धेषष्ठी तस्याउद्वाहृतिः ॥ ईशस्य ईशयोश्चापि ईशानां भक्तिरुत्तमा । यथा शिवस्यपादाम्बुवौ वंदयित्वा सुखीभवेत् । मयाकर्तृक षष्ठी उक्तकर्मक अनुक्त सम्बन्धाधिकरणक तस्या षष्ठयाः उदाहरणानुकुलो व्यापारः । अत्र राम कीर्त्योः विशेष्यविशेषणभाव सम्बन्ध विशेषणमप्रधानं विशेष्यं प्रधानं रामाप्रधानेऽत्र षष्ठीनतु की त्यौ प्राप्यते । यथावीरस्यराज्ञः पुरुषः समुद्रेमहति रत्नानि वसन्ति ॥ ५२ ॥

अनुक्तेचाधिकरणे .... विहारीणी ॥ ५३ ॥

अनुक्तेतिः यथा प्रत्ययरहिते अनुक्ते अधिकरणे सप्रमी जायते तयामपा उत्तरार्द्धे उदाहरणं दीयते ॥ यथारामे मेश्रीविहारिणी भवति । रामयोः श्रीविहारिण्यौ भवतः रामेषश्रिमः विहारिण्यः भवन्ति । तथान्यत्रेत्यन्वयः ।

अनुक्तेचाधिकरणे अत्राधोरे सप्तमी । सप्तन शब्दान्मट् टिड्ढेति ङीप् सप्तमी । जनी प्रादुर्भावे ज्ञा जनोर्जादेक्षः । सार्वधातुकेथक् जायते । सप्तमीसूत्रेण । सप्तमीरूपेकर्मधियक लटौ यथेत्यव्ययं पादप्रपूर्णार्थकं । उदाहरणमाहटीकाकारः कटेआस्ते कुमारोऽसौ वटे गावः सुशेरते तिलेषु विद्यते तैत्मं हृदिब्रह्मामृतं परं ॥ १ ॥ युद्धे संनह्य तेधीरोगुल्पप्रेकरिणं शतमिति षड्विध मधिकरणं चेति सरस्वती व्याकरणे । मया अनुक्तकर्तृक संप्तमी उक्तकर्मक रामविशेषणधिकरणक श्रीविहारिणीविशेष्यक-

ह्लंड्अधिकरणकसप्रमी जनमानु कर्मत्याव्यारां अनुक्ते चाधिकरणे सप्तमी .... ५३ इत्युदाहरणां .... ॥ ५४ ॥

इति एवं प्रकारेण उदाहृतय उदाहरणं सप्तस्वपि विभक्तिष्वषिं मया दत्ता केनचित् कारणेन आसां विभक्तीनां यथावस्थिति। अन्यत्र उदाहरणां नेरे अवस्थिति पूर्वोक्त सूत्रं विनारूपान्तरा पत्तित्यर्था पाणिनिना कृता तथा मया निगद्यतेऽत्र प्रबोधचन्द्रिकायां ॥ मया कर्तृक उदाहृति रुक्त कर्मक सप्त विनक्तच्यधिकरणक इति शब्दबोधित उदाहृत दत्तानुकूलो व्यापारः। ग्रन्थकारै अनुक्तकर्तृक अधिकरणक सप्त विभक्तिसंबंधि स्थितिरुक्त कर्मकऽअन्यत्राधि करणक मन्यत्र स्थिति निगदनानुकूलो व्यापारः ॥ सा स्थितिर्वर्ण्यते ह्यत्र उदाहरणपूर्विका तया मे प्रियतां शंभुचन्द्रमौलि सदाशिवः॥ तथा चोक्तं **श्रीभर्तरिः**। महेश्वरे वा जगतामधीश्वरे जनार्दनं वा जगदंतरात्मनि न वस्तुभेदः प्रतिपत्तिरस्तु मे। तथादि भावस्तरुणेन्दुशेखरे ॥ ५४ ॥

क्रियाविशेषणे द्वितीया प्रकरणे टीकाकार आहः— कर्मणौ च क्रिया बोध्या तत्कर्म क्लीवमुच्यते ॥ यथा संदेह रहितं ब्रह्मा विद्यां च लोकते ॥ १ ॥ यथा देवो ह्याजं प्रौढां प्रकारां जीवच्छार्दकां। ईक्षततां निराकर्तुं निःसंगैरपि साधनैः ॥ ६३ ॥

यद्यपि अस्मिन् प्रकरणे ७३ श्लोकाः सन्ति वैजल देवकृताः त्रिषकपर्यन्तं तु गोपालगिरिणा टीका कृता तथापि उपर्युक्त व्याख्यातिरिक्त सिद्धान्तकौमुदी भट्टोजि दीक्षितविरचित वृत्तिसहिता सूत्रसंहिताऽपि टीकाकारेण उद्धृता तेषां चात्र उल्लेखो न मया व्यधापि ।

Editors' Note

The reason for the apparent mistakes in the text, according to Prof. R. K. Choudhary, is that "the original manuscript (अ) on the basis of which the present Sanskrit text was prepared was corrupt. Since we are editing it with the help of other *MSS.* (which were equally corrupt, as the scribes do not seem to be well-versed in Sanskrit), we have maintained the spirit of the original, and the variants have been recorded in footnotes, and the corrections, if any, have been suggested".